दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णैकादशी
कार्तिक 20 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-6 ■ अङ्क-11 | 1 | नवम्बर 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 केन्द्रीय-मन्त्रिमण्डलेन द्रुत-गति-विशेष-न्यायालयानाम् केन्द्र-प्रायोजित-योजनायै निरन्तर सञ्चालनाय अनुमतिः प्रदत्ता

4 चुराह-क्षेत्रस्य त्रयः सर्वकारीय-विद्यालयाः सीबीएसई-मण्डलेन सम्बद्धाः भविष्यन्ति, महिलाः लप्स्यन्ते १५००-१५०० रूप्यकाणि

10 हिमाचलसर्वकारस्य घोषणा : दीपावल्याः प्राक् सर्वेभ्यः कर्मचारिभ्यः वेतनम्, १४४४ श्रमिकपरिवारेभ्यः ६.१० कोटिरूप्यकाणाम् उपहारः

केन्द्रीय-मन्त्रिमण्डलेन विकसित-भारत-साङ्ख्यिकीय-रूपान्तरण- अधिक- स्वीकृतिः प्रदत्ता



केन्द्रीय-मन्त्रिमण्डलेन विकसित-भारत-साङ्ख्यिकीय-रूपान्तरण-विश्लेषण-अनुसन्धान-उपक्रमाख्यायाः विस्तार-योजनायाः द्विसहस्रतमस्य षड्विंशति-सप्तविंशतितः द्विसहस्रतमस्य त्रिंशत्-एकत्रिंशत् पर्यन्तं पञ्च-वर्षावधये एकसप्तत्यधिक-त्रिशतोत्तर-चतुस्सहस्रकोटि-रूप्यकेभ्यः अधिक-परिव्ययेन सह स्वीकृतिः प्रदत्ता। इयं विस्तार-योजना समयानुकूलतायाः तथ्यांशानां सूक्ष्म-विस्ताराय, परस्पर-सञ्चालनीयतायाः अथ कृत्रिम बुद्ध्यनुकूलस्य एकीकृत-दत्तांश-जालस्य निर्माणाय एकां गतिशीलां, तात्कालिकीं, भविष्यद्-अनुकूलां च आधिकारिक-साङ्ख्यिकीय-संरचनां स्थापयितुं प्रारूपिता अस्ति। इयं योजना तात्कालिक-नीति-आवश्यकतानाम् आधारेण संसाधनानां गतिशील-विनियोगाय रणनीतिकं सौविध्यं प्रदास्यति, येन बृहत्-स्तरीय-सर्वेक्षणानां क्रियान्वयनम्, पद्धति-विषयकम् अनुसन्धानम्, अङ्कीय-रूपान्तरणं, राष्ट्रिय-दत्तांश-प्रशासनं च साकल्येन सम्भवं भविष्यति। विस्तार-योजना साङ्ख्यिकी-कार्यक्रम-कार्यान्वयन-मन्त्रालयस्य सर्वाणि साङ्ख्यिकीय-दत्तांश-प्रबन्धन-कार्याणि स्वीकरिष्यति, या देशस्य आधिकारिक-साङ्ख्यिकीय-प्रणाल्याः उन्नयने निर्णायक भूमिकां निर्वक्ष्यति। अपरत्र, मन्त्रिमण्डलेन पञ्चवर्षाणां कृते चतुर्दशाधिक-अष्टशतोत्तर- द्विसहस्रकोटि-रूप्यकाणां वित्तीय-प्रावधानेन सह महत्त्वपूर्ण-खनिज-संस्करण-प्रोत्साहनाय द्रव्यगत-व्यय-सहायता-योजना अपि अनुमोदिता। सम्प्रति महत्त्वपूर्ण-खनिजानां संस्करणं वैश्विक-स्तरे कतिपयेषु एव भौगोलिक क्षेत्रेषु केन्द्रितं वर्तते, यस्य विकेन्द्रीकरणाय स्वदेशीय-संवर्धनाय च भारत-सर्वकारेण एषः दृढः उपक्रमः आरब्धः।

अग्निवीराणां सेवा-काले वर्ष-द्वयस्य वर्धनं सम्मोद्यते; सहैव पोक्सो न्यायालयानां योजनायाः निरन्तरता कल्पते



केन्द्रीय-मन्त्रिमण्डलेन चतुर्वर्षीय-सेवानन्तरम् अपगन्तुं उद्यतानां अग्निवीराणां सेवा-काले वर्ष-द्वयस्य वर्धनं सम्मोद्यते। नवदेहल्याम् आयोजिते सम्भाषणे सर्वसेनापतिः जनरल एन.एस. राजा सुब्रह्मण्यः भाषते यत् ये पंचसप्ततिः प्रतिशतं अग्निवीराः अपगन्तुं वर्तन्ते स्म, तेभ्यः अधुना अतिरिक्तः द्विवर्षीयः सेवा-कालः लभ्यते, यस्यानन्तरं सर्वे इच्छुकाः अग्निवीराः सशस्त्र बलेषु समाविशन्ते। तेन भाष्यते यत् अग्निवीराणां प्रथमः सङ्घः चतुर्वर्षीय-कार्यकालस्य समाप्तौ वर्तते। एतेषु चतुर्ष वर्षेषु कृतानां कार्य-मूल्याङ्कनानाम् आधारेण भारतीय-सेना अग्निवीराणां श्रेष्ठ-प्रदर्शनेन मोदते। जनरल सुब्रह्मण्यस्यानुसारं पंचविंशति प्रतिशतं अग्निवीराः योग्यता-आधारेण नियमित-बलेषु कल्पन्ते। योजनायाः अन्तर्गतम् अवशिष्टाः पंचसप्ततिः प्रतिशतं अग्निवीराः वर्ष-द्वयस्य अतिरिक्तं सेवानुबन्धं लभन्ते । अस्य द्विवर्षीय-कार्यकालस्य पूर्णतायाम् इच्छुकाः अग्निवीराः सेनायां सङ्घटन्ते।

साउदी-नागरिकस्य हाशिम-अब्बासस्य संस्कृत-गीतेन मोदन्ते श्रोतारः, रियाद्-संस्कृतोत्सवे भासते भारत-साउदी-देशयोः मैत्री-सेतुः



रियाद-नगरे सम्पन्ने संस्कृतोत्सवकार्यक्रमे एका तादृशी भावपूर्णा घटना प्रावर्तत, यया उपस्थिताः सर्वे श्रोतारः अतीव भाव-विभोराः अमन्यन्त। साउदी अरेबिया-देशस्य नागरिकः श्रीमान् हाशिम-अब्बासः अति-सुन्दरं संस्कृत-गीतम् अगायत्, यत् श्रोतृभिः भूरि प्रशंस्यते। तस्य एषा प्रस्तुतिः प्रद्योतते यत् कथं संस्कृतिः, संगीतम्, भाषाश्च अस्मदीय-जनान् एकत्र सङ्घटयन्ते । एतत् भारत-साउदी-देशयोः मध्ये विद्यमानान् गभीर-सांस्कृतिक-सम्बन्धान्, सौहार्दम्, मैत्रीञ्च सम्यक् द्योतते।

सुभाषितम्

अपुत्रस्य गृहं शून्यं दिशः शून्यास्त्वबान्धवाः।
मूर्खस्य हृदयं शून्यं सर्वशून्या दरिद्रता॥

भावार्थः- संतानहीन मनुष्य का घर शून्य लगता है, बंधु- बांधवहीन के लिए सभी दिशाएँ शून्य हैं, मूर्ख का हृदय ज्ञान से शून्य होता है और दरिद्रता तो सबसे बड़ी शून्यता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालयीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तापत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमलदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

भारते वैद्युत-वाहनानां विपणिः तीव्रगत्या विस्तृता भवति - गडकरी



केन्द्रीय-परिवहन-राजमार्ग-मन्त्री नितिन गडकरी नवदेहल्यां आयोजिते ईवी-पारिस्थितिकी-तन्त्र-पुरस्कार-समारोहे सम्बोधयन् अवदत् यत् भारते वैद्युत-वाहनानां विपणिः तीव्रगत्या विस्तृता भवति । तेन स्पष्टीकृतं यत् वैद्युत-वाहन-पारिस्थितिकी-तन्त्रस्य सुदृढ़ीकरणेन अस्य क्षेत्रस्य आर्थिक-व्यावहारिकता अधिका वर्धिष्यते। श्रीगडकरी अकथयत् यत् वैद्युत-गतिशीलतायाः प्रोत्साहनेन आयातित तैलस्य उपरि देशस्य निर्भरता न्यूनीभविष्यति, प्रदूषण-नियन्त्रणे साहाय्यं प्राप्स्यते, अथ च वैद्युत-वाहन-क्षेत्रे भारतस्य आत्मनिर्भरता सुदृढा भविष्यति। केन्द्रीय-मन्त्रिणा जैव-एथेनाल्-आधारित-वाहनानां सम्भावनाः अपि विशेषतया प्रकाशिताः; सः प्रत्यपादयत् यत् वैकल्पिक-इन्धनानां व्यापकोपयोगेन पारम्परिक पेट्रोलियम्-इन्धने निर्भरता लक्षणीयरूपेण न्यूना भविष्यति, उपभोक्तृभ्यश्च महती आर्थिक-सुविधा प्राप्स्यते।

केन्द्रीय-मन्त्रिमण्डलेन द्रुत-गति-विशेष-न्यायालयानाम् केन्द्र-प्रायोजित-योजनायै निरन्तर सञ्चालनाय अनुमतिः प्रदत्ता



केन्द्रीय-मन्त्रिमण्डलेन द्रुत-गति-विशेष-न्यायालयानाम् केन्द्र-प्रायोजित-योजनायै षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य एप्रिल-मासस्य प्रथम-दिनाङ्कात् एकत्रिंशदधिक-द्विसहस्रतमवर्षस्य मार्च-मासस्य एकत्रिंशत्-दिनाङ्क यावत् निरन्तर सञ्चालनाय अनुमतिः प्रदत्ता। एतस्यै योजनायै अष्टाशीत्यधिक-सप्तशतोत्तर-त्रिसहस्रकोटिभ्यः अधिक-धनराशेः वित्तीय-प्रावधानं कृतम्, यत्र केन्द्र-सर्वकारस्य अंशः निर्भया-निधितः प्रदास्यते। अस्याः योजनायाः अन्तर्गतं विविध-राज्येषु केन्द्रशासित प्रदेशेषु च अनन्य-पोक्सो न्यायालयैः सह पञ्चाशदधिक-अष्टशतं द्रुत गति-विशेष-न्यायालयानां सञ्चालनस्य व्यवस्था अस्ति। अत्र बलात्कार-प्रकरणानां अथ पोक्सो-अधिनियमस्य द्वादशाधिक-द्विसहस्रतमस्य उल्लङ्घन-सम्बद्धानां प्रलम्बित-प्रकरणानां त्वरित निस्तारणाय प्रत्येकस्मिन् न्यायालये एकः समर्पितः न्यायिकाधिकारी, विशेष-लोक अभियोजकः षट् सहायक-कर्मकराश्च नियुक्ताः भविष्यन्ति। अस्याः योजनायाः प्रचालनेन लैङ्गिक अपराध-पीडितेभ्यः शीघ्र-वादश्रवणं समयबद्ध-न्यायश्च सुलभं भविष्यति, येन न्यायालयानां प्रलम्बित-प्रकरणानां संख्यायां लक्षणीया न्यूनता आगमिष्यति।

भारतीय-विदेशसचिवेन विक्रम-मिश्रि इत्यनेन काठमांडू-नगरे स्वस्य नेपाली-समकक्षेण अमृत-बहादुर-राय-इत्यनेन सह द्विपक्षीय-सम्बन्धानां दृढतायै तथा नेपालस्य प्रधानमन्त्रिणः आगामी-भारत-यात्रायाः सम्भाराणां विषये विस्तीर्णाः चर्चाः विधीयन्ते



भारतीय-विदेशसचिवेन विक्रम-मिश्रि इत्यनेन काठमांडू-नगरे स्वस्य नेपाली-समकक्षेण अमृत-बहादुर-राय-इत्यनेन सह द्विपक्षीय-सम्बन्धानां दृढतायै तथा नेपालस्य प्रधानमन्त्रिणः आगामी-भारत-यात्रायाः सम्भाराणां विषये विस्तीर्णाः चर्चाः विधीयन्ते। अस्मिन् सम्भाषणे द्वौ अपि विदेशसचिवौ परस्पर हितस्य विविधान् विषयान् विमृशतः तथा द्वयोः देशयोः मध्ये सहयोगस्य वर्धनाय अवसराः समुपलक्ष्यन्ते ।

रियाद-विमानपत्तने सञ्जाते आक्रमणे गम्भीररूपेण आहतस्य एकस्य भारतीय-नागरिकस्य चिकित्सालये निधनम् - साउदीअरब-भारतीयदूतावासः



साउदी अरब-स्थितेन भारतीय-दूतावासेन सदुःखं संसूचितं यत् विगत-मासस्य दशमे दिनाङ्के रियाद-विमानपत्तने सञ्जाते आक्रमणे गम्भीररूपेण आहतस्य एकस्य भारतीय-नागरिकस्य चिकित्सालये निधनम् अभवत्। दूतावासेन दिवङ्गतस्य नागरिकस्य शोकाकुलाय परिवाराय सुहृयश्च गभीर-शोकसंवेदनाः प्रकटिताः। दूतावास-पक्षतः स्पष्टीभूतं यत् परिवारस्य इच्छानुसारं दिवङ्गतस्य पार्थिव शरीरं भारतं प्रत्यानेतुं, अथवा रियाद-नगरे एव अन्तिम-संस्काराय सर्व-प्रकारकं सम्भवं साहाय्यं समुपस्थाप्यते।

प्रधानमन्त्री नरेन्द्रमोदी एशियाई-पैरा-क्रीडायां भागं गृहीतवद्भिः भारतीय-क्रीडक-दलस्य सदस्यैः सह प्रत्यक्षं संवादं करिष्यति



प्रधानमन्त्री नरेन्द्रमोदी इन्दिरा गान्धी-क्रीडा-संकुले षड्विंशत्यधिक-द्विसहस्रतमस्य एशियाई-पैरा-क्रीडायां भागं गृहीतवद्भिः भारतीय-क्रीडक-दलस्य सदस्यैः सह प्रत्यक्षं संवादं करिष्यति। अस्मिन् अवसरे प्रधानमन्त्री तत्र उपस्थितान् क्रीडकान् सम्बोधयिष्यति। जापानस्य आइची-नागोया-नगरे समनुष्ठितासु एशियाई-पैरा-क्रीडासु भारतेन स्वकीयम् अद्यावधि पर्यन्तं सर्वोत्कृष्टं प्रदर्शनं पञ्जीकृतम्, यत्र सप्तनवतिः पैरा-क्रीडकाः आहत्य चतुर्दशाधिक-शतम् पदकानि विजितवन्तः। अस्यां पदक तालिकायां त्रिंशत् स्वर्ण पदकानि, पञ्चत्रिंशत् रजत पदकानि, नवचत्वारिंशत् कांस्य पदकानि च समाविष्टानि सन्ति। अस्मिन् भव्य-समारोहे पदक विजेताः क्रीडकाः, प्रशिक्षकाः भारतीय-पैरालम्पिक्-समित्याः भारतीय-ओलम्पिक्-सङ्घस्य च अधिकारिणः, राष्ट्रिय-क्रीडा-महासंघानां प्रतिनिधयः, अथ च युवकार्य-क्रीडा-मन्त्रालयस्य उच्चाधिकारिणः उपस्थास्यन्ति।

अंशविपणिसमाचारः

भारतीयांशविपण्यां वृद्धिः दृष्टा

मुंबई,दिनाङ्कः – ०४ नवम्बर, २०२६
हिमसंस्कृतवार्ताः डॉ विमलेश झा

बीएसईसेन्सेक्स ७७,३०१.४० अङ्केषु, निफ्टी ५० २३,९६०.६० अङ्केषु च आगतः

भारतीयांशविपण्यां बुधवासरे, २०२६ तमस्य नवम्बरमासस्य चतुर्थे दिनाङ्के, निरन्तरं पञ्चमे व्यवसायसत्रे अपि उत्साहपूर्णं वातावरणं दृष्टम्। प्रमुखसूचकाङ्कयोः सेन्सेक्स-निफ्टी इत्यनयोः वृद्धिः अभवत्। निवेशकानां सकारात्मकभावनया तथा विदेशीसंस्थागतनिवेशकानां पुनः सक्रियतया भारतीयांशविपण्याः सुदृढता निरन्तरं वर्धते।बीएस ईसेन्सेक्ससूचकाङ्कः ३८३.५५ अङ्कैः (०.५० प्रतिशतं) वर्धित्वा ७७,३०१.४० अङ्केषु स्थितः अभवत् ।निफ्टी-५० सूचकाङ्कः१४९.७५ अङ्कैः (०.६३ प्रतिशतं) वर्धित्वा २३,९६०.६० अङ्केषु आगतः। निफ्टी-मिडकैप तथा निफ्टी-स्मॉलकैप सूचकाङ्कयोः अपि उल्लेखनीया वृद्धिः अभवत्। लघुमध्यमपरिमाणसंयन्त्राणां समभागेषु निवेशकानाम् उत्साहः विशेषतया दृष्टः।अमेरिका-देशस्य मध्यावधिकनिर्वाचनसम्बद्धाः घटनाः तथा भू-राजनैतिकतनावेषु शैथिल्यस्य सम्भावना वैश्विक-विपण्याः निवेशकानां भावनां प्रभावितवत्यः। अन्ताराष्ट्रियविपण्यां अपरिष्कृत-तैलस्य मूल्यस्य अवनतिः भारतस्य आर्थिकस्थितये अनुकूलतां जनयति। तेन महार्घतासम्बद्धचिन्ता अपि किञ्चित् न्यूनीभवति।भारतीयांशविपण्यां विदेशीयनिवेश-संचयनिवेशकानां पुनः क्रयप्रवृत्तिः दृष्टा। तेषां निवेशेन विपण्यां सकारात्मकता वर्धिता। अनेकप्रमुखसंयन्त्राणां द्वितीयत्रैमासिक-वित्तीय-परिणामाः निवेशकानाम् अपेक्षानुसारं सन्तोषजनकाः अभवन्। एतेन निवेशकानां विश्वासः सुदृढः जातः।भारतीयांशविपण्याः निरन्तरवृद्धिः निवेशकानां सकारात्मकदृष्टिकोणं दर्शयति। सेन्सेक्स-निफ्टी इत्येतयोः पञ्चदिनात्मकनिरन्तरवृद्धिः विपण्याः सुदृढतायाः महत्त्वपूर्णं सूचकं वर्तते। तथापि वैश्विकराजनैतिकपरिस्थितयः,अपरिष्कृततैलस्य मूल्यं तथा आगामीवित्तीयपरिणामाः आगामिषु व्यवसायसत्रेषु विपण्याः दिशां निर्धारयितुं शक्नुवन्ति।

रविः खरिडेहालः - बेङ्गलूरु।

"भारतस्य स्थिरा समृद्धिः पञ्चशत-गिगावाट-अक्षयऊर्जां लक्ष्यीकरोति।"

पञ्चशत-गिगावाट इत्युक्ते "५०० जी डब्ल्यू"। विगतदशके निर्मितेन नवीकरणीय ऊर्जाक्षमता ऊर्जासंकटस्य प्रबन्धने साहाय्यं कृतवती । नवीकरणीय ऊर्जा लक्ष्यं ५०० जी डब्ल्यू २०३० वर्षपर्यन्तं साध्यं भवति । भारतस्य अजीवाश्म-इन्धनस्य क्षमता ३०० जीडब्ल्यू इत्येव पारितवती अस्ति । आगामिदशके अपरं ५०० जीडब्ल्यू ऊर्जाक्षमतां योजयितुं योजना अस्ति ।यद्यपि कठिनः आह्वानः अस्ति तथापि तत् कर्तव्यम् अस्ति।निवेशक्षमतां प्रकाशयन् निवेशकाः भारतस्य नवीकरणीय ऊर्जाक्षेत्रे धनं स्थापयितुं आमन्त्रिताः सन्ति, राजनैतिकनीतिस्थिरतायाः च उद्धरणं दत्त्वा। आगामिदशकस्य अन्ते अस्मिन् क्षेत्रे २० लक्षकोटिरूप्यकाणां अधिकमूल्यानां अवसरानां उद्भवः भविष्यति इति अपेक्षा अस्ति । भारतस्य इत्यस्य नवीकरणीय ऊर्जाक्षेत्रे विगत २ वर्षेषु ६७ बिलियन डॉलरस्य निवेशः आकृष्टः अस्ति ।

'हिमकेयर'-स्थाने नूतना स्वास्थ्य-योजना, आदित्य- बिड़ला संस्थायै संविदा, जानीम कियता धनेन निर्मीयते पत्रकम्?



हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेशे 'हिमकेयर'- स्वास्थ्यबीमा-योजनायाः स्वरूपम् अधुना पूर्णतया परिवर्तयितुं गच्छति। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य विधानसभायां कृतायाः घोषणायाः अनुसारेण सर्वकारः प्रायः दशलक्षजनेभ्यः नूतनां स्वास्थ्यबीमा-योजनां प्रारब्धुं गच्छति। अस्यार्थं निविदाप्रक्रिया (टैण्डर-प्रक्रिया) सम्पूर्णा सञ्जाता, 'आदित्य- बिड़ला- बीमा- संस्थायै' योजनायाः निविदा आबण्टिता वर्तते। निविदाप्रक्रियायाम्अष्टौ संस्थाः भागं गृहीतवत्यः। नूतनव्यवस्थायाः प्रवृत्तौ सत्यां हिमकेयर-योजनान्तर्गततया प्राप्यमाणाः स्वास्थ्यसुविधाः नूतनबीमायोजनायां समाविष्टाः भविष्यन्ति।

यद्यपि येषां लाभार्थिनां हिमकेयर-पत्रकाणि अद्यापि वैधानि सन्ति, तेभ्यः पत्रकस्य निर्धारितावधेः पूर्णतां यावत् पूर्वतनयोजनायाः लाभः लभमानः स्थास्यति। तदनन्तरं तैः नूतनबीमायोजनायाः अन्तर्गततया पुनः पत्रकं निर्मापणीयम्। नूतन- स्वास्थ्य-बीमायोजना- अन्तर्गततया पत्रकनिर्माणाय लाभार्थिभ्यः वार्षिकं कियत् शुल्कं ग्रहीष्यते, इदम् अद्यापि पूर्णतया निर्धारितं नास्ति। कस्मात् परिवारात् कियती प्रव्याजिः (प्रीमियम- राशिः) ग्राह्या, तस्मिन् विषये सर्वकारेण निर्णयः करणीयः अवशिष्यते। ये जनाः प्रव्याजिं दातुं समर्थाः सन्ति, तेभ्यः द्विगुणं शुल्कं ग्रहीतुं प्रस्तावितम् अस्ति। यतो हि यदि केनचित् स्वस्तरे व्यक्तिगततया दशलक्ष (१० लक्ष) रूप्यकाणां स्वास्थ्यसुरक्षा- आवरणं (हेल्थ कवर) ग्रहीतव्यं स्यात्, तर्हि न्यूनतमतया विंशतितः पञ्चविंशतिसहस्र (२०,०००–२५,०००) रूप्यकाणि यावत् प्रव्याजिः देया भवति। बीमासंस्थायै सर्वकारः प्रतिपरिवारं ४२०० रूप्यकेषु स्वास्थ्यसुरक्षां प्रदास्यति। सर्वकारपक्षतः वार्षिकं ४२० कोटिरूप्यकाणि बीमासंस्थायै स्वास्थ्यबीमायै समर्पयिष्यन्ते, यदर्थं जनेभ्यः कियत् प्रव्याजिधनं ग्रहीतव्यम् इति निर्णयः अवशिष्टः। अस्याः स्वास्थ्यनीत्याः माध्यमेन प्रदेशस्य योग्यजनेभ्यः चिकित्सालयेषु उपचारसुविधा समुपलब्धा कारयिष्यते। नूतनव्यवस्थायां साम्प्रतं तेष्वेव सर्वकारीय- चिकित्सालयेषु बीमायोजनायाः पत्रकाणि मान्यानि भविष्यन्ति, यत्र पूर्वतः एव हिमकेयर- अन्तर्गततया निःशुल्कचिकित्सायाः सुविधा समुपलब्धा वर्तते। एतदतिरिच्य वैयक्तिकचिकित्सालयेषु अपोहनस्य (Dialysis/ डायलिसिस) सुविधायुक्तानि संस्थानानि अपि योजनायां समाविष्टानि सन्ति। तथापि अन्ये वैयक्तिकचिकित्सालयाः साम्प्रतं योजनायाः परिधेः बहिः स्थापितानि सन्ति। एते चिकित्सालयाः भविष्ये योजनायां समावेष्टव्याः न वा, अस्मिन् विषये सर्वकारः पश्चात् निर्णयं स्वीकरिष्यति। अस्य परिवर्तनस्य कारणात् प्रदेशस्य लक्षशः हिमकेयर-लाभार्थिभिः अधुना स्वकीय- स्वास्थ्यबीमा-सुविधायै नूतनव्यवस्थायाः अनुसारेण पत्रकनिर्माणस्य प्रक्रियातः गन्तव्यं भविष्यति।

चिकित्सालयेषु जनेभ्यः श्रेष्ठतर-स्वास्थ्यसुविधानां लाभप्रदानस्य उद्देश्येन नूतना स्वास्थ्यबीमायोजना प्रारभ्यते। अस्यार्थं निविदाप्रक्रिया सम्पूर्णा अभवत्। अष्टौ संस्थाः निविदाप्रक्रियायां भागं गृहीतवत्यः, यासु आदित्य-बिड़ला-संस्थायै एल-वन (L-1) संस्थारूपेण निविदा प्रदत्ता अस्ति।

आशीषसिंघमारः, स्वास्थ्यसचिवः, हिमाचलप्रदेशसर्वकारः

मण्ड्यां 'लोकतन्त्रं रक्षत, अराजकताम् अपसारयत' इति पदयात्रया भाजपा-दलस्य शक्तिप्रदर्शनम्



हिमसंस्कृतवार्ताः- मण्डी।

भाजपा-दलेन बुधवासरे मण्ड्यां 'लोकतन्त्रं रक्षत, अराजकताम् अपसारयत' इति पदयात्रायाः माध्यमेन स्वकीयशक्तेः प्रदर्शनं विहितम्। पड्डुल-क्रीडाङ्गणात् प्रारब्धायाम् अस्यां पदयात्रायां भाजपादलस्य ज्येष्ठाः नेतारः, विधायकाः, विपुलायां संख्यायां कार्यकर्तारश्च सहभागिनः अभवन्। सर्वे नेतारः कार्यकर्तारश्च पादचारेण सञ्चरन्तः नगरस्य विविधमार्गेभ्यः गत्वा सेरी-मञ्चं प्राप्नुवन्। दीर्घकालानन्तरं मण्ड्यां भाजपा-दलस्य एतावती विशाला जनसभा दृष्टा। पदयात्रायाः अन्तराले कार्यकर्तृभिः दलस्य समर्थनार्थं जयघोषाः कृताः, यदा तु सेरी-मञ्चे प्रधानमन्त्रिणः नरेन्द्रमोदिनः समर्थनार्थं प्रतिध्वनद्भिः उद्घोषैः कार्यक्रमे नूतनः उत्साहः सञ्चारितः। पदयात्रायां प्रतिपक्षनेता पूर्वमुख्यमन्त्री च जयरामठाकुरः, पूर्वमन्त्री सुरेशभारद्वाजः, यात्रायाः संयोजकः सुन्दरनगरस्य विधायकः राकेशजम्वालः, विधायकः इन्द्रसिंहगान्धी, द्रङ्ग-क्षेत्रस्य विधायकः पूर्णचन्दठाकुरः, करसोगस्य विधायकः दीपराजः, विधायकः प्रकाशराणा, भाजपा-मण्डलाध्यक्षः निहालचन्दः, पूर्वमन्त्री गोविन्दठाकुरश्च सहिताः दलस्य अनेके ज्येष्ठाः नेतारः उपस्थिताः आसन्।

सदर- विधायकस्य संसत्सदस्यायाश्च अनुपस्थितिः चर्चायाः विषयः अभवत्

अस्मिन् राजनैतिक-आयोजने मण्डी-सदर-क्षेत्रस्य विधायकस्य अनिलशर्मणः मण्डी-संसदीयक्षेत्रस्य संसत्सदस्यायाः (सांसद) कङ्गनारणौत-महोदयायाश्च अनुपस्थितिः चर्चायाः विषयः अभवत्।



ज्ञायते यत् सदर-विधायकः अनिलशर्मा विधानसभा-समित्याः अध्यक्षत्वेन केरल-राज्यस्य प्रवासे वर्तते। यद्यपि तस्य स्थाने तस्य सुपुत्रः आश्रयशर्मा किञ्चित् कालं यावत् पदयात्रायां सम्मिलितः अभवत्। आश्रयशर्मा सेरी-मञ्चेऽपि किञ्चित् कालं यावत् उपविष्टवान्, किन्तु कार्यक्रमस्य मध्ये एव ततः प्रस्थितवान्।

जयरामठाकुरेण काङ्ग्रेसदलम् अभिलक्ष्य प्रहारः कृतः

सेरीमञ्चे आयोजितायां सभायां प्रतिपक्षनेत्रा कार्यक्रमस्य मुख्यातिथिना जयरामठाकुरेण सहैव भाजपादलस्य अन्यैः ज्येष्ठनेतृभिः काङ्ग्रेससर्वकारम् अभिलक्ष्य तीक्ष्णाः आघाताः विहिताः। वक्तृभिः प्रदेशस्य काङ्ग्रेस-सर्वकारस्य कार्यप्रणाल्याम् उपरि प्रश्नाः उत्थापिताः। अस्मिन् अन्तराले राहुल-गान्धी काङ्ग्रेस-दलस्य राष्ट्रियाध्यक्षः मल्लिकार्जुनखडगे च अपि भाजपा-नेतृणां लक्ष्यान्तर्गतौ आस्ताम्। भाजपानेतारः अवदन् यत् लोकतन्त्रस्य हत्या तु काङ्ग्रेसदलेन एव कृता आसीत्, अद्यापि च काङ्ग्रेस-दलं देशे अराजकतां प्रसारयितुम् इच्छति।

चुराह-क्षेत्रस्य त्रयः सर्वकारीय-विद्यालयाः सीबीएसई-मण्डलेन सम्बद्धाः भविष्यन्ति, महिलाः लप्स्यन्ते १५००-१५०० रूप्यकाणि

हिमसंस्कृतवार्ता — चम्बा।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः बुधवासरे हिमाचलप्रदेशस्य चम्बा-मण्डलस्थस्य चुराह-विधानसभाक्षेत्रस्य कृते काञ्चन महत्त्वपूर्णाः घोषणाः अकरोत्। सः क्षेत्रस्य पञ्चदशसहस्र (१५,०००) महिलाभ्यः सर्वकारस्य चतुर्वर्षपूर्तेः अनन्तरं प्रतिमासं १५०० रूप्यकाणां प्रदानाय घोषणां विहितवान्। अपरत्र हिमगिरि- थल्ली-झज्जाकोठी-क्षेत्राणां त्रिषु सर्वकारीयविद्यालयेषु आगामिशैक्षणिकसत्रात् सीबीएसई (CBSE)-प्रतिरूपं (पैटर्न्) प्रवर्तिष्यते। एतदतिरिच्य लोकनिर्माणविभागस्य जलशक्तिविभागस्य च नवानां विकासपरियोजनानाम् उद्घाटनानि शिलान्यासाश्च प्रस्तावितानि सन्ति। एतासाम् उपरि कुलम् ६०.६७ कोटिरूप्यकाणि व्ययीकरिष्यन्ते।

मुख्यमन्त्री अवदत् यत् प्रदेशसर्वकारेण प्रशासनिकव्यवस्थां सरलां पारदर्शिनीं च विधातुं बहवः महत्त्वपूर्णाः पदक्षेपाः स्वीकृताः। उपमण्डलेषु (तहसील-कार्यालयेषु) भू-नामाङ्कनस्य (इन्तकालस्य) प्रक्रिया अन्तर्जालमाध्यमेन (ऑनलाइन) कृता। एतदतिरिच्य अन्याः आवश्यकाः सेवाः अपि अङ्कीयमाध्यमेन (डिजिटल-माध्यमेन) समुपलब्धाः क्रियन्ते। अनेन लघु-लघु-कार्याणां कृते जनेभ्यः वारं वारं तहसील-कार्यालयेषु भ्रमितुं न भविष्यति, गृहे एव उपविश्य च सुविधानां लाभः लब्धुं शक्यते।

मुख्यमन्त्री सुक्खूः अवदत्— भाजपा-विधायकेन जयरामठाकुरं प्रति शिक्षानीतिविषये प्रश्नाः किमर्थं नोत्थापिताः

मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः चुराह-क्षेत्रस्य भाजपा-विधायकमभिलक्ष्य प्रहारं कुर्वन् प्रावोचत् यत् सः पञ्चदशवर्षाणि यावत् क्षेत्रस्य विधायकः आसीत्, किन्तु तस्मिन् काले शिक्षानीतिम् अधिकृत्य तेन प्रश्नाः किमर्थं नोत्थापिताः? सः अपृच्छत् यत् तत्कालीनस्य मुख्यमन्त्रिणः जयरामठाकुरस्य कार्यकाले अयं विषयः किमर्थं नोत्थापितः? सुक्खू-महोदयः अवदत् यत् चुराह-क्षेत्रस्य काङ्ग्रेस-नेतॄणाम् अनुरुद्धौ सत्यां क्षेत्रस्य त्रीन् सर्वकारीयविद्यालयान् केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन (सीबीएसई) सह सम्बद्धीकर्तुं निर्णयः स्वीकृतः। आगामिशैक्षणिकसत्रात् एतेषु सीबीएसई-पाठ्यक्रमस्य कक्षाः प्रारप्स्यन्ते।



कक्षाणां प्रारम्भात् पूर्वमेव शिक्षकाणां नियुक्तिः विधास्यते। सः विज्ञापितवान् यत् क्षेत्रस्य अन्येषां त्रयाणां विद्यालयानाम् अपि सीबीएसई-मण्डलेन सह सम्बद्धीकरणस्य प्रस्तावे विचारः क्रियमाणः वर्तते। अस्यार्थं छात्रसंख्यायाः आधारेण निर्णयः स्वीकरिष्यते। येषु विद्यालयेषु ३०० तः ४०० यावत् छात्राः भविष्यन्ति, तेऽपि अस्याः व्यवस्थायाः परिधौ आनेतुं शक्यन्ते। सम्बद्धविद्यालयानाम् अभिलेखाः (रेकार्ड) समाहूताः सन्ति। मुख्यमन्त्री अवदत् यत् तीसा-विद्यालयं सीबीएसई-मण्डलेन सम्बद्धीकर्तुं निर्णयः प्रदेशसर्वकारेण स्वीकृतः, किन्तु स्थानीय-भाजपा-विधायकेन अस्यार्थं कृतज्ञता अपि न प्रदर्शिता।राजस्थानं प्रति विद्युद्विक्रयणं विधाय चतुर्षु *मासेषु ४००

कोटिरूप्यकाणि अर्जयिष्यति हिमाचलम्: सुक्खू-महोदयः

मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः प्रावोचत् यत् प्रदेशसर्वकारेण संसाधनानां समुचितोपयोगं कृत्वा हिमाचलस्य आर्थिकस्थितेः दृढीकरणाय बहवः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। राजस्थानं प्रति १५.५० रूप्यकाणि प्रति-मात्रकस्य (यूनिट्) दरेण विद्युद्विक्रयस्य सन्धिः कृता। अनेन आगामिषु चतुर्षु मासेषु प्रदेशाय प्रायः ४०० कोटिरूप्यकाणाम् आयः भविष्यति। सर्वकारः भ्रष्टाचारस्य गुप्तद्वाराणि पिधाय हिमाचलम् आत्मनिर्भरं विधातुं कार्यं कुर्वन् अस्ति। मुख्यमन्त्री चुराह-विधानसभाक्षेत्रे चतुरः सीबीएसई-विद्यालयान् उद्घाटयितुम् अपि उद्बोषम् अकरोत्। बुधवासरे भञ्जराट्ट-क्षेत्रे मुख्यमन्त्री अवदत् यत् बैरास्यूल-जलविद्युत्-परियोजनायाः सञ्चालनस्य चतुश्चत्वारिंशत् (४४) वर्षपूर्तौ प्रदेशस्य निःशुल्क-विद्युद्-अंशभागं वर्धयित्वा पञ्चाशत् प्रतिशतं (५०%) कर्तुं केन्द्रसर्वकारस्य समक्षं सबलं पक्षः उपस्थापितः वर्तते।

कर्कटरोगिणां पीडाशमनाय वैद्यदलानि गृहं गमिष्यन्ति, शिमलायाः इन्दिरा गान्धी आयुर्विज्ञान-महाविद्यालयेन (IGMC) विशेषसेवा प्रारब्धा



हिमसंस्कृतवार्ताः- शिमला।

इन्दिरागान्धी चिकित्सा महाविद्यालयस्य रुग्णालस्य च (आईजीएमसी) शिमला-सोलननगरयोः त्रिंशत्-किलोमीटर- परिमितक्षेत्रे निवसोतां कर्करोगादि-गम्भीरवेदनापीडितानां रुग्णानाम् इदानीं स्वगृहे एव उपचारः प्राप्स्यते। आईजीएमसी-इत्यस्य वेदना-उपशमन- चिकित्सा- 'कैनस्पोट', 'सिप्ला-उपशमन- प्रतिष्ठानस्य' च सहयोगेन शय्यायां स्थातुमसमर्थानाम् असहायानां रुग्णानां कृते इयं विशेषसेवा प्रारब्धा। परिजनानां साहाय्येन साहाय्यवाणी- दूरभाषसङ्ख्यायाम् (हेल्पलाइन-नंबर) सूचने प्रेषिते सति विभागस्य विशेषदलं रुग्णस्य गृहं गत्वा तस्मै असह्यवेदनायाः मुक्तिं दातुं उपचारं प्रदास्यति। अनेन प्रयत्नेन अस्पतालम् आनयनस्य क्लेशात् मुक्तिः भविष्यति, परिजनानां चिन्ता च अपि दूरीभविष्यति। उभाभ्यां क्षेत्राभ्यां अस्य प्रयोगस्य सफलयोः सतोः प्रान्तस्य अन्येष्वपि चिकित्सालयेषु इदृशीं सुविधां प्रदातुं प्रस्तावः सरकाराय प्रेषयिष्यते। विभागेन अस्य कृते गृह-आधारित- उपशमन- चिकित्सादलद्वयं गठितम् अस्ति। प्रत्येकस्मिन् दले एकः चिकित्सकः, एका परिचारिका, एकः परामर्शकः च अन्तर्भवति। विभागस्य प्राध्यापकः डा॰. विनय सोम्या अवदत् यत् रुग्णानां वेदनायाः उपशमनार्थम् इयं गृहद्वारसेवा प्रारब्धा अस्ति। एतदतिरिक्तं रुग्णाः आईजीएमसी-इत्यस्य टर्शरी- कैंसर- सेण्टर- इत्यस्य बहिरङ्गविभागस्य पञ्चमकक्ष्ये चिकित्सकीय-परामर्शमपि प्राप्तुं शक्नुवन्ति। 8448191580 इत्यस्मिन् दूरभाषसङ्ख्यायां सम्पर्कीय सुविधां प्राप्नुवन्तु। शय्यातः उत्थातुम् असमर्थाः रुग्णाः तेषां परिजनाः वा साहाय्यवाणीदूरभाषसङ्ख्याम् 8448191580 इत्येतम् आहूय अस्याः सेवायाः लाभं ग्रहीतुं शक्नुवन्ति। टर्शरी-कैंसर-सेण्टर इत्यस्य विभागाध्यक्षः डा. मनीषगुप्ता अवदत् यत् आईजीएमसी, सोलननगरस्य त्रिंशत्- किलोमीटर-परिमितक्षेत्रे गृह- आधारित- उपशमन- चिकित्सा-सुविधाः रुग्णेभ्यः गृहे एव दीयन्ते।

श्रीशिवप्रसादसंस्कृतमहाविद्यालयस्य परिसरस्य दर्शनात् अष्टचत्वारिंशद्वर्षपूर्वस्मृतीनां पुनर्नवोदयः

नूतननिर्माणैः, छात्रावासकक्षैः वटुकानां च सान्निध्येन प्राङ्गणं शोभायमानम्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। श्रीशिवप्रसाद- संस्कृत- महाविद्यालयस्य परिसरं गत्वा अष्टचत्वारिंशद्वर्षपूर्वस्य स्मृतीनां पुनः स्मरणम् अभवत्। तदेव भवनम्, ताः एव प्राचीराः, स एव प्राङ्गणः; परन्तु प्राङ्गणे विराजमानः नूतनः भूतभावनः भगवान् शिवः, छात्रावासस्य नवनिर्मिताः कक्षाः, आचार्यविनोदकुमारमिश्रस्य श्रमेण सङ्कल्पेन च प्रज्वालिताः लघुदीपाः इव अन्तेवासिनः वटवः च विशेषतया मनः आकर्षितवन्तः। एतेषु वटुकेषु केचन अवश्यं भविष्यति स्वविद्यया, संस्कारैः, प्रतिभया च समाजे ज्ञानप्रकाशं प्रसारयिष्यन्ति इति दृढा आशा अस्ति। महाविद्यालयस्य प्रगतये आचार्यस्य विनोदकुमारमिश्रस्य परिश्रमः सङ्कल्पश्च प्रशंसनीयः। हृदयस्य गहनतमप्रदेशात् अभिनन्दनपूर्वकं हार्दिक्यः अशेषाः शुभकामनाः आशीर्वादाश्च समर्पिताः।



मोटरबीमाक्षेत्रे उपभोक्तृणां स्वेच्छायाः प्राधान्यम्, दिसम्बरमासस्य १५ दिनाङ्कात् नूतनाः नियमाः प्रवर्तिष्यन्ते।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, नवदेहली

भारतीयबीमा- विनियामक-विकास-प्राधिकरणस्य नूतनव्यवस्थानुसारं २०२६ तमस्य वर्षस्य दिसम्बरमासस्य १५ दिनाङ्कात् मोटरवाहनबीमाक्षेत्रे चतुर्भागात्मकं नूतनं व्यवस्थातन्त्रं प्रवर्तिष्यते।

अस्याः व्यवस्थायाः अन्तर्गतं वाहनस्वामिनः स्वावश्यकतानुसारं बीमासंरक्षणं चेतुं शक्नुवन्ति। तृतीयपक्षीयं बीमासंरक्षणम् अनिवार्यं भविष्यति, अन्यानि अतिरिक्तसंरक्षणानि वैकल्पिकानि भविष्यन्ति।वाहनस्य स्वकीयक्षतिपूर्तिः पृथक् चेतुं शक्यते। यात्रिणां, पश्चादुपविष्टानां व्यक्तीनां च दायित्वसम्बद्धं बीमासंरक्षणम् अपि वैकल्पिकं भविष्यति।बीमाकम्पनयः प्रत्येकस्य बीमासंरक्षणस्य प्रीमियमराशिं पृथक्-पृथक् स्पष्टतया प्रदर्शयिष्यन्ति। बीमापत्रं क्रेतुं समये ग्राहकाय विकल्पप्रपत्रं, सूचनापत्रं च दातव्यम् अनिवार्यं भविष्यति। पूर्वमेव तृतीयपक्षीयबीमापत्रं धारयन्तः वाहनस्वामिनः अपि अतिरिक्तं प्रीमियमं दत्त्वा यात्रिणां बीमासंरक्षणं योजयितुं शक्नुवन्ति। अनेन नूतननियमेन वाहनस्वामिनः स्वावश्यकतानुसारं बीमासंरक्षणं स्वीकर्तुम्, अनावश्यकव्ययात् च परिरक्षितुम् अवसरं प्राप्स्यन्ति।

अमर्यादितभाषया सूचनायाः याचना न कर्तुं शक्यते- मोहम्मद नदीमः अशिष्टाम् अपमानजनकभाषायां लिखिता याचना सूचना-आयुक्तेन निरस्ता



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ।

उत्तरप्रदेश- राज्यसूचनायोगेन सूचनाधिकार-अधिनियमस्य अन्तर्गतं एकस्याम् याचिकायाम् प्रयुक्ताम् अमर्यादिताम् आपत्तिजनकां च भाषां गम्भीरतया स्वीकृत्य सा याचिका निरस्तः।

राज्यसूचना-आयुक्तः मोहम्मद नदीमः स्वकीयादेशे स्पष्टम् उक्तवान् यत् सूचनाधिकार-अधिनियमः कस्मैचित् आवेदकाय लोकसूचनाधिकारिणां वा अन्यं प्रति अपशब्दप्रयोगस्य अभद्रभाषायाः वा अधिकारं न ददाति। अस्मिन् प्रकरणे अपीलकर्त्रा स्वकीयप्रार्थनापत्रे वरिष्ठपुलिसाधीक्षकसहितानां बहूनां जनानां विषये अत्यन्तम् अपमानजनकाः आपत्तिजनकाश्च शब्दाः प्रयुक्ताः आसन्।सूचनायुक्तः उक्तवान् यत् लोकतान्त्रिकव्यवस्थायां प्रत्येकस्य नागरिकस्य सूचना-प्राप्तेः अधिकारः अस्ति, किन्तु तस्य उपयोगे शालीनता मर्यादा च अनिवार्यतया पालनीया। आयुक्तेन स्पष्टं कृतं यत् आवेदकः यदि इच्छितां सूचनां प्राप्तुम् इच्छति तर्हि शिष्टया मर्यादितया च भाषया नियमानुसारं नवीनम् आवेदनं प्रस्तुतं कर्तुं शक्नोति। आयोगः तु अमर्यादितभाषायां प्रस्तुतायां याचिकायां श्रवणं कर्तुं बाध्यः नास्ति।

संस्कृतविद्यालयेषु ५१४९ छात्राणां वित्तकोषलेखाः आधार-संयोजनरहिताः, छात्रवृत्तिलाभात् वञ्चिताः भवितुम् अर्हन्ति

छात्रवृत्तेः लाभाय वित्तकोषलेखेषु आधारसंयोजनं सुनिश्चितं कर्तुं शिक्षानिदेशकस्य निर्देशः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, प्रयागराजम्। उत्तरप्रदेशे सञ्चालितेषु संस्कृत-विद्यालयेषु, संस्कृतमहाविद्यालयेषु, सम्पूर्णानन्द-संस्कृत- विश्वविद्यालये अध्ययनरतछात्राणां छात्रवृत्तिवितरणस्य सम्बन्धे माध्यमिक-शिक्षानिदेशालयेन महत्त्वपूर्णः निर्देशः निर्गतः।शिक्षासत्रे २०२६-२७ मध्ये उत्तरप्रदेशशासनस्य छात्रवृत्तिपोर्टलस्य (scholarship.up.gov.in) माध्यमेन ऑनलाइन प्रक्रियया छात्रवृत्त्याः आबंटनं भविष्यति। किन्तु संस्कृतविद्यालयेषु, महाविद्यालयेषु, सम्पूर्णानन्द- संस्कृत-विश्वविद्यालये अध्ययनरताः ५१४९ छात्राः सन्ति, येषां वित्तकोषलेखा अद्यापि आधारसंख्यया संयोजिताः न सन्ति। अतः नियमानुसारं छात्रवृत्तिलाभात् ते वञ्चिताः भवितुम् अर्हन्ति।अस्य विषयस्य गाम्भीर्यं दृष्ट्वा शिक्षानिदेशकस्य (माध्यमिक) सामान्य-द्वितीय-विस्तार-अनुभागेन सर्वेषां जनपदानां विद्यालयनिरीक्षकान् निर्देशितं यत् ते सम्बन्धितविद्यालयानां प्रधानाचार्यैः समन्वयं संस्थाप्य उक्तानां ५१४९ छात्राणां वित्तकोषलेखेषु आधार-संयोजनं शीघ्रं कारयेयुः।

निर्देशे स्पष्टं कृतं यत् छात्रवृत्तेः लाभात् कोऽपि पात्रः छात्रः वञ्चितः न भवेत्, एतदर्थं आवश्यककार्याचरणं समये एव सम्पादनीया। अस्मिन् सम्बन्धे छात्राणां सूची अपि विभागेन उपलब्धा कारिता अस्ति। विभागेन छात्रहितं दृष्ट्वा सर्वेषां सम्बन्धिताधिकारिणां विद्यालय-प्रधानाचार्येभ्यः च त्वरितकार्याचरणं कर्तुं निर्देशः प्रदत्तः।

उत्सवपर्वसु शान्तिः सुरक्षा च सर्वोच्चप्राथमिकता- मुख्यमन्त्री



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः वीडियो कॉन्फरेन्सिङ्गमाध्यमेन आयोजितायां समीक्षागोष्ठ्यां दीपोत्सव-दीपावली- छठपर्व- देवदीपावलीपर्वणां दृष्ट्या सम्बन्धिताधिकारिभ्यः आवश्यकनिर्देशान् दत्तवान्। मुख्यमन्त्री अवदत् यत् उत्सवपर्वाणां हर्षोल्लासः कदापि उपद्रवे परिणतुं न दीयते। सामाजिक- सौहार्दस्य सुरक्षायाश्च संरक्षणं सर्वाधिकं प्राथमिकतया भवेत्। अराजकतत्त्वानां विरुद्धं शून्यसहिष्णुतानीत्या कठोरकार्याचरणं क्रियेत। उत्सवकाले शासनस्तरतः आरभ्य आरक्षि- स्थानकपर्यन्तं सर्वेषाम् अधिकारिणां कर्मचारिणां च अवकाशाः निरस्ताः सन्ति।

मुख्यमन्त्री निर्देशं दत्तवान् यत् विपणिषु चतुर्विंशतिः होरासु आरक्षिणां निरीक्षणं भवेत्। आतिशबाजीविक्रयः मुक्तस्थानेषु एव अनुमन्येत। सम्पूर्णप्रदेशे विद्युत्-जलयोः निर्बाधापूर्तिः सुनिश्चितीक्रियेत। सार्वजनिकवितरणप्रणाल्यां राशनवितरणसमये न्यूनतौलस्य प्रकरणेषु कार्याचरणं भवेत्। निवृत्तिवेतनभोगिनां चिकित्सा- व्ययसम्बद्धानां देयकानां शीघ्रनिस्तारणं क्रियेत। बहिःस्रोतसि नियुक्तानां कर्मचारिणाम् आङ्गनवाड़ी- कार्यकर्त्रीणां च मानदेयस्य समयेन भुगतानं सुनिश्चितं भवेत्। कृषकाणां पुरतः काऽपि समस्या न उत्पद्येत, धानक्रयणव्यवस्था सुचारुरूपेण सञ्चाल्येत इति निर्देशः प्रदत्तः।

कूटानुसूचितजनजाति प्रमाणपत्रेण सेवां प्राप्तवत्याः शिक्षिकायाः विरुद्धं कठोराचरणम्

हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेयः

सिद्धार्थनगरजनपदे कूटानुसूचितजनजाति प्रमाणपत्रस्य आधारेण नियुक्तिं प्राप्तवत्याः सुनैना गौड् इत्याख्यायाः शिक्षिकायाः विरुद्धं बेसिकशिक्षाधिकारी शैलेशकुमारेण महत्त्वपूर्णः निर्णयः कृतः। तस्याः सेवासमाप्त्यादेशे संशोधनं कुर्वन् नियुक्तिदिनाङ्कात् अर्थात् २०१० तमस्य वर्षस्य जुलाईमासस्य ३० दिनाङ्कात् एव सेवासमाप्तिः प्रभावी भविष्यतीति आदेशितम्। तया नियुक्तिदिनाङ्कात् अद्यावधि प्राप्तस्य सम्पूर्णवेतनस्य पुनर्वसूलीकरणस्य आदेशोऽपि निर्गतः। सम्बन्धितखण्डशिक्षाधिकारिणं तस्याः विरुद्धं सम्बन्धितपुलिसस्थानके प्राथमिकी (FIR) पञ्जीकारयितुं निर्देशः प्रदत्तः।अपरञ्च, बेसिकशिक्षाधिकारी शैलेशकुमारेण निर्गते पत्रे मानवसम्पदापोर्टल् इत्यत्र कार्याचरणं अभिलेखयितुं तथा विभागीयकार्याचरणं सम्पादयितुं निर्देशाः प्रदत्ताः।

यातायातमासः- २०२६- सड़कदुर्घटनानां निवारणाय सिद्धार्थनगरपुलिसस्य विशेषा रणनीतिः, सर्वेषां स्थानकानां सीसीदल- कर्मचारिभिः सह समुपवेशनम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जनपदे राजमार्गदुर्घटनानां प्रभावी नियन्त्रणाय यातायातव्यवस्थायाश्च सुदृढीकरणाय पुलिसप्रशासनेन प्रयासाः तीव्राः कृताः। यातायातमासस्य- २०२६ अन्तर्गतं मङ्गलवासरे पुलिसलाइनसभागारे जनपदस्य सर्वेषां थानानां सीसीदलेषु नियुक्तैः पुलिसकर्मचारिभिः सह विशेषोपवेशनम् आयोजितम्। उपवेशने जनपदे घटितानां सड़कदुर्घटनानां मासिकसमीक्षा कृता। दुर्घटनानां कारणानि, दुर्घटनाप्रवणक्षेत्राणि, यातायातव्यवस्थायाः सुदृढीकरणोपायाः च विस्तरेण चर्चिताः। यातायातक्षेत्राधिकारी राजकुमारसिंहस्य पर्यवेक्षणे यातायातप्रभारी अजयकुमारसिंहेन पुलिसकर्मचारिभ्यः यातायातनियमानां कठोरपालनं कारयितुं, दुर्घटनानां निवारणाय प्रभाविकार्याचरणं कर्तुं, जनसहभागितया व्यापकजनजागरूकता-भियानानि च सञ्चालयितुं निर्देशाः प्रदत्ताः। दुर्घटनानां न्यूनीकरणाय नियमितसमीक्षायाः प्रभावि-निरोधात्मक-कार्याचरणां च आवश्यकतायां विशेषबलं प्रदत्तम्। पुलिसप्रशासनस्य कथनमस्ति यत् सड़कदुर्घटनानां न्यूनीकरणाय, यातायातव्यवस्थायाः सुचारुसञ्चालनाय तथा सामान्यजनान् सुरक्षित-यातायातविषये जागरूकान् कर्तुं निरन्तरप्रयासाः क्रियन्ते।



जैविककृषेः संवर्धनाय एकीकृत-कीटप्रबन्धन- प्रशिक्षणम् सम्पन्नम्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गोरखपुरम्। केन्द्रीयैकीकृतकीटप्रबन्धनकेन्द्रस्य, गोरखपुरस्य, महायोगी- गोरखनाथ- विश्वविद्यालयस्य च कृषिसङ्कायस्य संयुक्ततत्त्वावधाने नवम्बरमासस्य द्वितीय- तृतीयदिनाङ्कयोः एकीकृतकीटप्रबन्धनप्रविधीनां जैविककारकाणां च उत्पादनविषये द्विदिवसीय- प्रशिक्षणकार्यक्रमः सम्पन्नः। कृषिसङ्कायस्य अधिष्ठाता डॉ. विमलकुमारदुबेवर्यस्य मार्गदर्शने, सहायकाचार्या डॉ. सास्वतीप्रेमकुमारीवर्यायाः च नेतृत्वे आयोजिते कार्यक्रमे बी.एससी. कृषिविज्ञानस्य द्वितीयवर्षीयाः छात्राः सहभागिताम् अकुर्वन्। प्रशिक्षणकाले विशेषज्ञैः जैविककीटनियन्त्रणं, बीजोपचारः, सस्यचक्रं, फेरोमोनपाशाः, ट्राइकोडर्मा- ब्यूवेरिया इत्यादीनां जैविककारकाणाम् उत्पादनविधयः व्यावहारिकरूपेण अवबोधिताः। कार्यक्रमे मुख्यातिथिः डॉ. विमलकुमारदुबे, विशिष्टातिथिः राहुलमिश्रः, डॉ. सास्वतीप्रेमकुमारी, अनुजपाण्डेयः सहिताः अन्ये च गणमान्यजनाः उपस्थिताः आसन्। प्रशिक्षणस्य माध्यमेन विद्यार्थिभ्यः पर्यावरणानुकूलकृषेः, जैविककीटनियन्त्रणस्य, आधुनिककीटप्रबन्धनस्य च व्यावहारिकं ज्ञानं प्राप्तम्।

बालबालिकाभिः रामायणाधारितायाः मनोहारिण्याः नृत्यनाटिकायाः प्रस्तुतीकरणेन त्रेतायुगस्य सजीवचित्रणं सम्पन्नम्

भागलपुरम् दिनांक ०४/११/२०२६
हिमसंस्कृतवार्ताः- डॉ विमलेश झा



दीपावल्याः पावनावसरे बिहारराज्यस्यडीएवी-पब्लिकस्कूलबरारी, भागलपुरस्य प्राङ्गणे एलकेजीतः द्वितीयकक्षापर्यन्तं पठन्तः छात्राः छात्राश्च रामायणमाधारितां भव्यां मनोहारिणीं च नृत्यनाटिकाम् प्रस्तुतवन्तः। बालकलाकाराणां भावपूर्णाभिनयः, आकर्षकवेशभूषा, मनोहारिणी नृत्यप्रस्तुतिश्च उपस्थितानां दर्शकाणां मनांसि आकृष्टवन्तः। अस्य सांस्कृतिककार्यक्रमस्य माध्यमेन बालकैः भारतीयसंस्कृतेः, धार्मिकश्रद्धायाः, मर्यादापुरुषोत्तमस्य श्रीरामस्य च आदर्शानां सुन्दरं चित्रणं कृतम्। अस्याः नृत्यनाटिकायाः निर्देशनं विद्यालयस्य शिक्षिका समृद्धिमण्डलमहोदयया कृतम्। तस्याः कुशलनिर्देशने बालकलाकारैः रामायणस्य विविधाः घटनाः सजीवतया रङ्गमञ्चे प्रस्तुताः।नाटिकायां भगवतः श्रीरामस्य जीवनसम्बद्धाः विविधाः घटनाः सजीवतया अभिनीताः। छात्रैः श्रीरामस्य आदर्शचरित्रस्य, लक्ष्मणस्य भ्रातृप्रेम्णः, हनुमतः अनन्यभक्तेः तथा रावणस्य अहङ्कारस्य च भावपूर्णं चित्रणं कृतम्। बालकलाकारैः स्वाभिनयमाध्यमेन एषः सन्देशः प्रसारितः यत् असत्यस्य उपरि सत्यस्य, अधर्मस्य उपरि धर्मस्य, अहङ्कारस्य उपरि विनम्रतायाश्च सदैव विजयः भवति। वानरसेनायाः राक्षससेनायाश्च भूमिकासु सुसज्जितान् बालकान् दृष्ट्वा एतादृशः अनुभवः जायते स्म, यत् सम्पूर्णं विद्यालयप्राङ्गणं त्रेतायुगमिव परिवर्तितम् अस्ति। विविधवर्णीयानि वस्त्राणि, आकर्षकवेशभूषा, सजीवाः भावभङ्गिमाः, नृत्यस्य मनोहारिण्यः मुद्राश्च रामायणस्य प्रसङ्गान् दर्शकाणां समक्षं सजीवान् अकरोत्। बालकलाकाराणां सहजाभिव्यक्तिः आत्मविश्वासश्च प्रमाणितवान् यत् समुचितमार्गदर्शनं प्रोत्साहनं च प्राप्य बालप्रतिभाः स्वोत्कृष्टतां प्रदर्शयितुं समर्थाः भवन्ति।अस्मिन् अवसरे विद्यालयस्य प्राचार्यः सह सहायक क्षेत्रीयाधिकारी श्री अनिलकुमारमहोदयः बालबालिकानां उत्कृष्टप्रस्तुतेः प्रशंसां कुर्वन् अवदत् यत् रामायणं केवलं धार्मिकग्रन्थः न, अपितु जीवनस्य उच्चादर्शानां, नैतिकमूल्यानां, कर्तव्यबोधस्य च अमूल्या निधिः अस्ति। भगवतः श्रीरामस्य जीवनं सत्यस्य, मर्यादायाः, त्यागस्य, धैर्यस्य, करुणायाः, कर्तव्यपरायणतायाश्च सन्देशं ददाति।तेन उक्तं यत् अस्याः नृत्यनाटिकायाः माध्यमेन बालकैः एषः सन्देशः प्रदत्तः यत् अस्माभिः सर्वदा सत्यस्य मार्गे गन्तव्यं तथा जीवनस्य प्रत्येकस्मिन् परिस्थितौ नैतिकमूल्यानां पालनं करणीयम्। भगवान् श्रीरामस्य आदर्शचरित्रम् अस्मान् शिक्षयति यत् प्रतिकूलपरिस्थितिष्वपि धर्मस्य सत्यस्य च मार्गः न त्यक्तव्यः। दीपावलीपर्व अपि अस्मान् अन्धकारात् प्रकाशं प्रति, असत्यात् सत्यं प्रति, निराशायाः आशां प्रति च गन्तुं प्रेरयति। विद्यालये एतादृशानां सांस्कृतिककार्यक्रमाणाम् आयोजनं छात्राणां सर्वाङ्गीणविकासाय अत्यन्तम् आवश्यकम् अस्ति। एतेन बालकेषु आत्मविश्वासः, सृजनात्मकता, सामूहिकसहयोगः, अनुशासनं, भारतीय-सांस्कृतिकपरम्परासु सम्मानभावना च विकसन्ति। कार्यक्रमस्य अवसरे उपस्थितैः शिक्षक-शिक्षिकाभिः दर्शकैश्च बालकलाकाराणां मनोहारिणी प्रस्तुति मुक्तकण्ठेन प्रशंसिता। बालानां मनोमुग्धकारी प्रस्तुतेः कारणेन दीपावल्याः उत्सवी वातावरणम् अधिकम् उल्लासपूर्णम् अभवत्। इत्थं रामायणाधारितेयं नृत्यनाटिका मनोरञ्जनस्य सहैव छात्राणां नैतिकशिक्षायाः, सांस्कृतिकचेतनायाः, जीवनमूल्यानां संवर्धनस्य च प्रभावी माध्यमम् अभवत्।

अखिलभारतीय- प्राच्यविद्यासम्मेलने कविकुलगुरु-कालिदास- संस्कृत- विश्वविद्यालयस्य उत्कृष्टं प्रदर्शनम्



हिमसंस्कृतवार्ताः- डॉ रेणुका बोकारे, नागपुरम्।
हरिद्वारस्थे पतञ्जलि-विश्वविद्यालये सद्य एव अखिलभारतीय- प्राच्यविद्या- परिषदः (AIOC) द्विपञ्चाशत्तमम् अधिवेशनं साफल्येन सम्पन्नं जातम्। पतञ्जलि-विश्वविद्यालयस्य माननीयानां कुलाधिपतीनां स्वामिरामदेवमहोदयानां, कुलपतीनाम् आचार्य-बालकृष्णमहोदयानां, प्रतिकुलपतीनां साध्वी-देवप्रियामहोदयानां नेतृत्वे मार्गदर्शने चायोजितेऽस्मिन् सम्मेलने देशविदेशेभ्यः प्रायः ३,००० प्रतिनिधयः, संस्कृतविद्वांसः, विविधानां विश्वविद्यालयानां माननीयाः कुलपतयश्च समवेताः आसन्।

विश्वविद्यालयस्य सोत्साहं सहभागिता

कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य माननीयानां कुलपतीनां डॉ. अतुलवैद्यमहोदयानां प्रेरणया विश्वविद्यालयस्य आहत्य १०४ प्रतिनिधिभिः अस्मिन् सम्मेलने सहभागिता कृता। एतेषु २२ प्राध्यापकाः, १६ स्नातकोत्तरच्छात्राः, ६५ शोधच्छात्राः तथा च एकः प्रशासनाधिकारिणः समाविष्टाः आसन्। विश्वविद्यालयस्य पक्षतः सम्मेलने आहत्य १०१ शोधपत्राणि समुपस्थापितानि।

सम्मेलनस्य साफल्ये प्राध्यापकानां महत्त्वपूर्णं योगदानम्

अखिलभारतीय- प्राच्यविद्या- सम्मेलनस्य सफले आयोजने विश्वविद्यालयस्य सर्वेषां प्राध्यापकानां महत्त्वपूर्णं योगदानम् आसीत्। संस्कृत-संस्कृतेतर- सङ्कायस्य अधिष्ठात्री प्रो. कविता होले ५२ तमस्य अधिवेशनस्य प्रधानसचिवा आसीत्। तया सम्मेलनस्य आयोजने महत्त्वपूर्णं मार्गदर्शनं प्रदत्तं, समग्रस्य आयोजनस्य योजनायां क्रियान्वयने च तस्याः मुख्या भूमिका वर्तते स्म। तथैव रत्नागिरि-उपकल्पस्य सञ्चालकः डॉ. दिनकर-मराठेमहोदयः सर्वेषां शोधपत्रसत्राणां नियोजनस्य संयोजनस्य च कार्यं साफल्येन समन्वितवान्। देशविदेशेभ्यः सम्प्राप्तानां प्रायः १,००० शोधपत्राणां द्वाविंशतौ (२२) विविधेषु शैक्षणिक-विभागेषु नियोजनं कश्चन अतीव दुष्करः उपक्रमः आसीत्। तस्य कुशलनियोजनस्य समन्वयस्य च सर्वत्र भूरिशः प्रशंसा सञ्जाता।

कुलपतिभिः डॉ. अतुलवैद्यमहोदयैः विश्वविद्यालयस्य प्रदर्शनं श्लाघितम्

माननीयैः कुलगुरुभिः डॉ. अतुलवैद्यमहोदयैः विश्वविद्यालयस्य प्राध्यापकानां, छात्राणां, शोधच्छात्राणां प्रशासनाधिकारिणश्च उत्कृष्टं प्रदर्शनं नेतृत्वसामर्थ्यं च भूरिशः श्लाघितम्। तैरुक्तं यत् राष्ट्रियस्तरस्य अस्मिन् प्रतिष्ठिते सम्मेलने सर्वेषाम् इयं सामूहिकी उपलब्धिः विश्वविद्यालयस्य शैक्षणिकोत्कर्षम् अनुसन्धानसामर्थ्यं च प्रमाणीकरोति। डॉ. वैद्यमहोदयैः सर्वेषां सहभागिनाम् अभिनन्दनं हार्दिकं च स्वागतं विहितम्।

अखिलभारतीय- प्राच्यविद्या- सम्मेलनस्य कार्यसमितौ विश्वविद्यालयस्य प्राध्यापकानां समावेशः

आगामिनः २०२६ तः २०२८ पर्यन्तस्य कार्यकालस्य कृते प्रो. कविता होले महोदया पुनः अखिलभारतीय- प्राच्यविद्यापरिषदः प्रधानसचिवपदे निर्वाचिता। एतदतिरिच्य प्रो. हरेकृष्ण अगस्ती, प्रो. प्रसाद गोखले, डॉ. जयवन्त चौधरी, प्रो. पराग जोशी, प्रो. दिनकर मराठे च इत्येते कार्यसमितेः सदस्यत्वेन निर्वाचिताः सन्ति।

संस्कृतकविगोष्ठ्याः अध्यक्षता प्रो. पराग जोशिना कृता

संस्कृतभाषा-साहित्यविभागस्य विभागाध्यक्षेण युवाविद्वद्वत्नसम्मानेन च विभूषितेन प्रो. पराग जोशिना संस्कृतकविगोष्ठ्याः अध्यक्षता विहिता। अस्यां गोष्ठ्यां समग्रदेशात् प्रायः २५ कवयः सम्मिलिताः अभवन्। अस्मिन् प्रसङ्गे प्रो. जोशिमहोदयेन परमपूज्यस्य स्वामि-रामदेवस्य समक्षं स्वकीया प्रसिद्धा 'सुता' इति कविता श्राविता। विश्वविद्यालयस्य शास्त्रागुरुकुलस्य प्राध्यापकेन डॉ. निशान्तमिश्रेणापि संस्कृतकाव्यं प्रस्तुतम्।

शास्त्रार्थसभायाः अध्यक्षतां प्रो. प्रसाद-गोखले कृतवान्

वेदाङ्गज्योतिषविभागस्य विभागाध्यक्षः प्रो. प्रसादगोखले शास्त्रार्थसभायाः अन्तर्गतम् आयोजितस्य ज्योतिषसत्रस्य अध्यक्षताम् अकरोत्।

ब्रह्मवादिनीसभायां विश्वविद्यालयस्य विदुषीणां सहभागिता

ब्रह्मवादिनीसभायां विश्वविद्यालयस्य प्रा. सिमरन ठाकुर तथा च प्रा. राधादेशकर इत्येताभ्यां भागं गृहीत्वा पारम्परिकशास्त्रार्थपद्धत्या स्वकीय-विद्वत्तापूर्णाः विचाराः उपस्थापिताः।

नागपुरस्य विदुषां सम्मानः-

सम्मेलनस्य विविधानां शैक्षणिकविभागानाम् अध्यक्षता विश्वविद्यालयस्य विद्वद्भिः कृता। एतेषु-

> प्रो. कलापिनी अगस्ती भारतीयदर्शन-तत्त्वज्ञानविभागस्य,

> डॉ. राजेन्द्र-जैनः- प्राकृत-जैनाध्ययनविभागस्य,

> प्रो. नन्दापुरी, संस्कृत- अभिजात-भाषाविभागस्य,

> श्रीनन्दकिशोर-पत्तार्किने-महोदयश्च भारतीयविद्या- पुनरीक्षणविभागस्य अध्यक्षतां कृतवन्तः।

उल्लेखनीयमस्ति यत् इतः पूर्वं नागपुरे सम्पन्ने अखिलभारतीय- प्राच्यविद्या- सम्मेलनस्य शताब्दिधिवेशने, उडुपीनगरे आयोजिते सम्मेलने साफल्येन संयोजनस्य अनुभवः विश्वविद्यालयस्य प्राध्यापकानां पार्श्वे आसीत्। इममेवानुभवं वैदुष्यं च संवीक्ष्य पतञ्जलि-विश्वविद्यालयेन तेभ्यः परामर्शः मार्गदर्शनं च स्वीकृतम्। एतत् नागपुरस्य तथा च विश्वविद्यालयस्य कृते गौरवस्य विषयो वर्तते।

उत्कृष्टशोधपत्रेभ्यः विश्वविद्यालयस्य छात्रेभ्यः पुरस्काराः

विश्वविद्यालयस्य छात्रेभ्यः शोधच्छात्रेभ्यश्च विविधशैक्षणिकविभागेषु उत्कृष्टशोधपत्रप्रस्तुत्यै पुरस्काराः प्रदत्ताः तेषुः-

> बोम्पदेवरा-विष्णुवर्धन-महोदयाय 'प्राचीनविज्ञानं प्रविधिः च' इति विभागे पुरस्कारः प्राप्तः।

> शोधच्छात्राय लीलाधरशर्मणे 'वेद-व्याकरणविभागे' पुरस्कारः लब्धः।

> शोधच्छात्राभ्यां रोहिणीशालिग्राम-काञ्चनसुतोणे- महोदयाभ्यां 'संस्कृत- साहित्य-विभागे' पुरस्काराः प्राप्ताः।

एते सर्वेऽपि पुरस्काराः पतञ्जलि-विश्वविद्यालयस्य माननीयानां कुलाधिपतीनां परमपूज्यस्वामि-रामदेवमहाराजानां करकमलैः समर्पिताः।

सम्मेलनस्य व्यापकः प्रचार-प्रसारः

अखिलभारतीय- प्राच्यविद्या- सम्मेलनस्य प्रचार-प्रसारस्य माध्यमसमन्वयस्य च दायित्वं विश्वविद्यालयस्य जनसम्पर्काधिकारिण्या डॉ. रेणुका बोकारेमहोदयया साफल्येन निर्व्यूढम्। मुद्रणमाध्यमानां, सामाजिकानां पटलानां, विविधानां विद्युन्माध्यमानां च साहाय्येन सम्मेलनाय समग्रदेशे व्यापका ख्यातिः प्राप्ता।

डॉ. रेणुका-बोकारे-महोदयायै शोधपत्रद्वयाय पुरस्कारद्वयम्

डॉ. रेणुकाबोकारे-महोदया सम्मेलने प्रस्तुताभ्यां स्वकीयशोधपत्राभ्यां द्वाभ्यां प्रतिष्ठितपुरस्काराभ्यां सम्मानिता जाता। 'सौन्दर्यशास्त्रं काव्यशास्त्रं च' इति विभागे प्रस्तुतस्य शोधपत्रस्य कृते तस्यै 'स्रग्धरा-नन्दिनी-पुरस्कारः','भारतीयविद्या-पुनरीक्षणविभागे' प्रस्तुतस्य शोधपत्रस्य कृते 'प्रेसिडेण्ट- पुरस्कारः' समर्पितः। एतौ उभौ अपि पुरस्कारौ परमपूज्यस्वामि- रामदेवमहाराजानां पावनकरकमलैः प्रदत्तौ

अखिलभारतीय- प्राच्यविद्या- सम्मेलने 'हिमसंस्कृतवार्ता' इति माध्यमस्य भूरिशः प्रशंसा; हिमाचलस्य शिक्षकाणां प्रयासः सर्वत्र प्रशंसितः

- डॉ रेणुका बोकारे।

हरिद्वारस्थे पतञ्जलि-विश्वविद्यालये सद्यः सम्पन्ने द्विपञ्चाशत्तमे (५२ तमे) अखिलभारतीय-प्राच्यविद्या- सम्मेलने 'हिमसंस्कृतवार्ता' इति संस्कृतमाध्यमेन विहितस्य समग्रप्रसारणस्य, वृत्तसङ्कलनस्य, सजीवप्रसारणस्य च सर्वत्र उच्चैः प्रशंसा सञ्जाता। सम्मेलनस्य माध्यमसमन्वयिकया डॉ. रेणुकाबोकारे- महोदयया वृत्तविभागे विज्ञापितं यत् प्राच्यविद्यायाः अस्य ऐतिहासिक-ज्ञानकुम्भस्य संस्कृतभाषामाध्यमेन वार्ताप्रसारणाय पतञ्जलि-विश्वविद्यालयस्य कुलपतयः श्रद्धेयाः आचार्याः बालकृष्णाः, नवदेहलीस्थ- केन्द्रीय- संस्कृत-विश्वविद्यालयस्य कुलपतयः सम्मेलनाध्यक्षाश्च प्रो. श्रीनिवास-वरखेडीमहोदयाः, अन्ये च देशस्य लब्धप्रतिष्ठाः कुलपतयः, संस्कृताचार्याः, विद्वांसश्च 'हिमसंस्कृतवार्ता' इत्यस्य कार्यशैलीं मुक्तकण्ठेन प्रशंसितवन्तः। डॉ. रेणुकाबोकारे अवदत् यत् हिमाचलप्रदेशस्य समर्पितैः संस्कृतशिक्षकैः प्रचालितः अयम् आभासीप्रकल्पः आधुनिकयुगे देववाणी-संस्कृतं जनसामान्यं यावत् प्रापयितुं कश्चन अनुपमः श्लाघनीयश्च प्रयासः वर्तते। सम्मेलनस्य शैक्षणिकसत्राणां, विद्वद्विमर्शानां, सन्तसम्मेलनस्य च वार्ताः शुद्धसंस्कृतमाध्यमेन अविलम्बेन सम्प्रेष्य 'हिमसंस्कृतवार्ता' इत्यनेन महती संस्कृतसेवा विहिता। आचार्य-बालकृष्णमहोदयैः प्रो. श्रीनिवास- वरखेडी-महोदयैश्च हिमाचलप्रदेशस्य संस्कृतशिक्षकाणाम् एतं विनम्रं किन्तु क्रान्तिकारिणं प्रयासम् अनवरतं पुरतः नेतुं शुभाशीर्वादाः मङ्गलकामनाश्च प्रदत्ताः। सहैव एतस्य प्रकल्पस्य उत्तरोत्तर-संवर्धनाय, विकासाय, सुदृढीकरणाय च भविष्येऽपि सर्वविधं सहकार्यं साहाय्यं च विधातुं पूर्णः विश्वासः प्रकटितः। उल्लेखनीयं यत् विगतपञ्चवर्षेभ्यः 'हिमसंस्कृतम् न्यासः' इत्यस्य तत्त्वावधाने प्रचाल्यमानम् एतत् ई-माध्यमं दैनिक-संस्कृतवार्तानां सङ्कलनं कृत्वा वैश्विकपटले संस्कृतस्य प्रचारप्रसारे निरन्तरं संलग्नम् अस्ति। हरिद्वार-महासम्मेलने लब्धया अनया प्रेरणया उत्साहितः हिमसंस्कृतवार्ता-परिवारः संस्कृतजगति नूतनोत्कर्षं साधयितुं कटिबद्धः अस्ति।

नवोत्साहेन सम्पन्नम्-

अखिलभारतीय- प्राच्यविद्या- सम्मेलनम्



हिमसंस्कृतवार्ताः- आचार्यः ओमप्रकाशः 'राही'।

योगक्षेत्रे स्वनामधन्यैः स्वामि-रामदेव-महोदयैः, चायुर्वेदक्षेत्रे पूज्यैः आचार्य- बालकृष्ण- महोदयैः समग्रविश्वे पुनरेकवारं भारतस्य कीर्तिपताकां समुत्तोल्य स्वकीयां विशिष्टां ख्यातिं सम्पादितवता हरिद्वारस्थेन पतञ्जलिविश्वविद्यालयेन अक्तूबरमासस्य २९ दिनाङ्कतः ३१ दिनाङ्कं यावत् आयोजितम् 'अखिलभारतीय- प्राच्यविद्या-सम्मेलनम्' भव्ये दिव्ये च वातावरणे एकेन नवोत्साहेन सह सम्पन्नं जातम्। अस्मिन् सम्मेलने भारतस्य चतुर्भ्यः कोणेभ्यः समागतैः शोधकर्तृभिः प्रायशः अष्टादशशतं (१८००) शोधपत्राणि प्रस्तूयन्त। अस्मिन् ऐतिहासिके समारोहे 'सनातन- शास्त्र- विमर्श- आचार्यसभा' इत्यस्याः अन्तर्गते सार्धशताधिकानां (१५०+) साधु-सन्तानाम्, अन्येषां विदुषां तथा च द्वात्रिंशतः (३२) कुलपतीनां गरिमामय्याम् उपस्थितौ मुक्तरूपेण गम्भीरा चर्चा सञ्जाता।द्वितीये दिने अक्तूबर-मासस्य ३० तमे दिनाङ्के प्रातः नववादनाद् (९:००) आरभ्य निशीथं सार्धनववादनं (९:३०) यावत् अविरामं सार्ध-त्रयोदश-होराः (१३:३०) यावत् प्रवृत्तेऽस्मिन् ऐतिहासिके विमर्शे सनातनशास्त्रेषु परम्परासु च जायमानान् प्रक्षेपांश्च वर्तमाने कृत्रिमप्रज्ञायाः (AI) प्रहारान् अधिकृत्य चर्चां कुर्वद्भिः सर्वैः तेषां निवारणार्थं गाम्भीर्येण कार्यकरणाय एकमतेन सहमतिः प्रदत्ता। अस्यां सार्ध-त्रयोदशहोरात्मिकायां गोष्ठ्यां स्वामिरामदेवस्य अखण्डोपस्थित्या योगशक्तेः प्रत्यक्षम् उदाहरणं प्रदाय सर्वे विस्मिताः कृताः। सः दृश्यविशेषः दर्शनीयः वक्तव्यं च श्रवणीयं जातं यदा स्वामी रामदेवः मञ्चाद् अवतीर्य साक्षात् दर्शकदीर्घिकायां गत्वा स्वकीयेन प्रभावशालिना वक्तव्येन सह सभागारस्य सम्पूर्णं परिक्रमणं कृत्वा पुनः मञ्चं प्राप्तवान्। 'रामेण' सह लक्ष्मण इव स्वकीयाम् एकनिष्ठां भावनां प्रदर्शयन्तः आचार्याः बालकृष्णाः यत्र समग्रायाः व्यवस्थायाः निरीक्षणं कुर्वन्तः आसन्, तत्रैव समयानुकूलं मञ्चे तेषाम् उपस्थितिः ओजस्विनी वाणी च समारोहस्य शोभां द्विगुणितां कुर्वती आसीत्।मुख्यसमारोहः विश्वविद्यालयस्य भव्ये सभागारे प्रचलति स्म, अपरपक्षे शोधपत्रवाचनं काव्यपाठश्चेत्यादयः अन्ये कार्यक्रमाः अन्यकक्षेषु सुव्यवस्थितरूपेण प्राचलन्। मञ्चे समाहूतानाम् अतिथीनाम् आवास-भोजनादिव्यवस्थाः सर्वाः अतीव उत्तमाः आसन्, यासु प्रबन्धसमितेः आचार्यैः सह विश्वविद्यालयस्य चतुश्शतं (४००) छात्राणां कार्यतत्परतया सेवाभावेन च समेषां मनांसि जितानि। समारोहस्य अन्ते विश्वविद्यालयस्य प्रतिकुलपतिना डॉ. देवप्रियया प्रस्तुतस्य त्रिदिवसीयसम्मेलनस्य प्रतिवेदनस्यानुसारं समारोहे पञ्चत्रिंशतः (३५) ग्रन्थानां लोकार्पणमपि सम्पन्नं, द्विशतं (२००) छात्रैः अप्रतिम- सांस्कृतिक- कार्यक्रमाणां प्रस्तुतीकरणेन स्वप्रतिभायाः प्रकृष्टः परिचयः प्रदत्तः। उत्कृष्टसमग्रप्रबन्धनसहितं स्वलक्ष्यं प्रति अग्रेसरम् एतत् त्रिदिवसीयं सम्मेलनं समुपस्थितानां सर्वेषां जनानाम् अन्तर्मनसि स्वकीयां चिरस्थायिनीं स्मृतिं परिचयं चामुञ्चत्, यदर्थं कुलाधिपतयः स्वनामधन्याः स्वामिनः रामदेवाः, कुलपतयः आचार्याः बालकृष्णाः, प्रतिकुलपतिः डॉ. देवप्रिया, आचार्यः देवसुमनश्च इत्येतेषां सहिताः सर्वे सहयोगिनः अभिनन्दनार्हाः सन्ति। अस्य त्रिदिवसीयस्य राष्ट्रियसम्मेलनस्य साक्षिणः भवितुं गौरवं सम्प्राप्य अन्तर्मनसि अङ्किताया तस्याः भव्यस्य, दिव्यस्य, अविस्मरणीयस्य च प्रदर्शनस्य कानिचन चित्राणि अत्र संविभज्य विशेषस्यानन्दस्यानुभूतिः जायते।

दिल्ली पब्लिक स्कूलस्य छात्राः दीपावल्याः सांस्कृतिकमहत्त्वेन परिचिताः

संस्कृतसंस्कृति- विकाससंस्थानस्य



विद्यालयस्य च संयुक्ततत्त्वावधाने आयोजिते जागरूकताकार्यक्रमे दीपावल्याः ऐतिहासिक-धार्मिक- सांस्कृतिकपक्षाणां विवेचनम्।

हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।

लखनऊस्थस्य शहीदपथस्थितस्य दिल्ली पब्लिक विद्यालयस्य संस्कृतसंस्कृतिविकाससंस्थानस्य च संयुक्ततत्त्वावधाने २०२६ तमस्य वर्षस्य नवम्बरमासस्य ४ दिनाङ्के दीपावलीमासमहोत्सवस्य अन्तर्गतं विशेषः जागरूकताकार्यक्रमः आयोजितः। कार्यक्रमस्य प्रमुखोद्देश्यं विद्यार्थिनः दीपावलीपर्वणः ऐतिहासिकेन, धार्मिकेन सांस्कृतिकेन च महत्त्वेन परिचितान् कारयितुम् आसीत्। कार्यक्रमे शिक्षिका शालिनीशुक्ला तथा विद्यालयस्य शिक्षकः राहुलदुबे विद्यार्थिभ्यः दीपावल्याः परम्पराणां, सांस्कृतिकमहत्त्वस्य पर्वसम्बद्धानां जीवनमूल्यानां च विषये विस्तरेण जानकारीं प्रदत्तवन्तौ। अस्मिन्नवसरे छात्रैः दीपावलीसम्बद्धाः कविताः प्रस्तुत्य स्वकीयायाः सृजनात्मकप्रतिभायाः परिचयः प्रदत्तः।

वक्तृभिः दीपावली प्रकाशस्य, हर्षोल्लासस्य सकारात्मकतायाश्च पर्व इति वर्णिता। ते विद्यार्थिनः पर्वणः मूलसन्देशं स्वजीवने आचरितुं प्रेरितवन्तः। अस्य कार्यक्रमस्य माध्यमेन नवपीढीं भारतीयसंस्कृत्या सांस्कृतिकपरम्पराभिश्च सह सम्बद्धां कर्तुं सार्थकः प्रयासः कृतः।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

व्याकरणचिन्तनम् -०२

ठक् (इक) इति प्रत्ययं प्रयुज्य, अभ्यासाय विंशतिवाक्यानाम् उदाहरणम्-

१. सः धार्मिकः पुरुषः अस्ति।
२. मम शिष्यः वैदिकः विद्वान् अस्ति।
३.सामाजिकः नियमः पालनीयः।
४. एतत् पुस्तकम् ऐतिहासिकम् अस्ति।
५. सा साहित्यिकी गोष्ठी सम्यक् लोकसेवां करोति।
६. गीता दार्शनिकः ग्रन्थः अस्ति।
७. नैतिकः आचारः श्रेष्ठः भवति।
८. सः राजनैतिकः नेता अस्ति।
९. बुद्धिः नाम मानसिकः व्यापारः।
१०. अहिंसा मानविकः धर्मः अस्ति।
११. प्राकृतिकी शोभा मनोहरा भवति।
१२. अद्य मासिकं वेतनं प्राप्तम्।
१३. वार्षिकः उत्सवः आगतः।
१४. एषः तार्किकः प्रश्नः अस्ति।
१५. लौकिकः व्यवहारः अपि ज्ञेयः।
१६. सा पौराणिकी कथा अस्ति।
१७. शारीरिकं बलं आवश्यकम्।
१८. नैयायिकः तर्कः स्पष्टः अस्ति।
१९. मम इदानीं साप्ताहिकः अवकाशः अस्ति।
२०. आध्यात्मिकः आनन्दः शाश्वतः अस्ति। ठक्-प्रत्ययस्य विधिः मननीयः - प्रथमस्वरस्य वृद्धिः - अ - आ, इ - ऐ, उ - औ

धर्म + इक = धार्मिक,
नीति + इक = नैतिक,
उपचार + इक = औपचारिक,

इत्येतादृशः ठक्-प्रत्ययान्तशब्दः विशेषणं भवति, अर्थात् त्रिषु लिङ्गेषु सम्भवति। यथा- धार्मिकः/ धार्मिकी/ धार्मिकम् इत्यादि इति।

"बोधकथा" जीवनपाठः

"ये अस्माकं मूल्यं न जानाति तेभ्यः दूरं तिष्ठन्तु" मृत्योः पूर्वं पिता पुत्रमब्रवीत्, मम पितामहः मह्यं एषा घटिकाम् अयच्छत्। एषा घटिका द्विसहस्र वर्षेभ्यः पुरातनी अस्ति। अहं तुभ्यं एतां घटिकां ददामि, त्वं सुवर्णालङ्कारस्य आपणं गत्वा केवलं मूल्यं पृष्ट्वा प्रत्यागच्छतु। तदनुसारेण सः आपणं गत्वा मूल्यं पृष्टवान्। प्रत्यागत्वा स्वपितरम् अवदत्- एतया घटिकायाः मूल्यं शताधिकपञ्चाशत् [१५०] इति आपणिकेन उक्तः। आपणिक उक्तवान् एषा घटिका बह्वी पुरातनी अस्ति इति उक्तम्। पिता अवदत् अस्तु। पिता पुत्रम् आदिशत् इदानीं त्वं त्याज्यवस्तूनि आपणं गच्छतु। पित्रादेशानुसार पुत्र त्याज्यवस्तूनि आपणं गत्वा घटिकायाः मूल्यं अपृच्छत्। तेन केवलः विंशति [२०] रुप्यकाणि इति उक्तः। इदानीं पिता पुत्रम् अवदत् अधुना सङ्ग्रहालये गच्छतु। पुत्र सङ्ग्रहालयम् अगच्छत्, तदनन्तरं सः अत्यान्देन गृहम् प्रत्यागतः। पितरं च उक्तवान् सङ्ग्रहालयस्य व्यवस्थापकः एतां घटिकां दुर्लभां मत्वा अमूल्यानां वस्तूनां सङ्ग्रहे स्थानं दत्तं, पञ्चलक्षरुप्यकाणि [५ लाख] दातुं प्रस्तावः। पिता स्मितहास्य कृत्वा अवदत्- योग्यस्थाने एव युष्माकं योग्यं मूल्यं भवति। स्वमूल्यं विपरीत स्थाने मा अन्विष्यतु।

"काकः कृष्णः पिकः कृष्णस्त्वभेदः पिककाकयोः।
वसन्ते समुपायते काकः काकः पिकः पिकः।।"



हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

वैदिकवाङ्मये कृषिविज्ञानस्य स्वरूपम्



- नेहा कुमारी जम्मू

कृषिः एव अस्माकं जीवनस्य मूलाधारः अस्ति। अस्माकं देशः कृषिप्रधानः अस्ति। कृष्या एव मनुष्याणां जीवनयात्रा सिध्यति। अत एव वैदिक-मनीषिभिः कृषिकर्मणः दिव्यत्वं समुद्घोषितम्। सम्प्रति कृषेः उन्नत्यर्थं विज्ञानस्य साहाय्येन कृषिकर्म क्रियते। उन्नतानां बीजानाम् अन्वेषणम्, कृषिसाधनानां वैज्ञानिकीकरणम्, कृषिभूमेः वैज्ञानिकं परीक्षणम् इत्यादीनां सम्यक्तया सम्पादनाय सर्वकारेण सर्वविधं प्रयत्नः विहितः अस्ति। यस्मिन् देशे क्षेत्राणि सम्यक् कृष्यन्ते तत्र धनधान्यं वर्धते। कारणं कृषिः एव सर्वश्रेष्ठं धनम् अस्ति। ऐहिकपारलौकिक- उभय-सुखशान्तिलाभाय कृषेः परमा आवश्यकता अस्ति। कृषिसमृद्ध्यैव राष्ट्रस्य अभ्युदयो भवति इति सुनिश्चितम्। अतः यथार्थेन भगवान् पतञ्जलिः आह "अर्थवानयं देश उच्यते यस्मिन् गावः सस्यानि च वर्तन्ते इति।" कृषिः श्रियः सौख्यस्य सौन्दर्यस्य च निधानम्। सम्प्रति अस्माकं देशः कृषिं प्रति सविशेषं जागरूकोऽस्ति, यतोहि कृषेरभ्युदयेन एव अस्माकं राष्ट्रः मूर्धन्यस्थानम् अवाप्तुं शक्नोति।

एतदर्थं ऋग्वेदे कृषेः वर्णना दृश्यते "अक्षैर्मादिव्यः कृषिमित् कृषस्व, वित्ते रमस्व बहुमन्यमानः।" सांप्रतिके युगे अन्नं परित्यज्य न कोऽपि जीवः स्थातुं शक्यते। अतः अन्नोत्पत्त्यार्थं कृषिविषयकं ज्ञानं नितान्तम् आवश्यकम्। शुक्लयजुर्वेदस्य काण्वशाखायां कृषेः उपयोगिता विषये वर्णनं दृश्यते। यत् यथा-

"युनक्त सीरा वि युगा तनुध्वं
कृधे योनौ वपतेह बीजम्।
गिरा च सृष्टिः सभरा असन्नो
नेदीय इत्सृण्यः पक्वमेयात्॥"

अस्यायम् अर्थः यत् कृषकैः हलानि योजनीयानि, युगानि विस्तारयितव्यानि, कृष्टे क्षेत्रे बीजं वप्तव्यम्। एवं कृते सति वाण्याः प्रसादेन अन्नस्य प्रचुरता भवति, कृषकस्य श्रमः च सफलो भवति।

एवं वैदिकवाङ्मये कृषिः न केवलं जीवनोपायः, अपितु धर्मः, संस्कृतिः, राष्ट्रसमृद्धेः च आधारः इति प्रतिपादितम्। अद्यापि यदि वयं वैदिककृषिदृष्टिं स्वीकुर्मः तर्हि पर्यावरणरक्षणेन सह अन्नसमृद्धिः अपि सिध्यति।

वार्ता-संवादः



नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य काश्चन विचित्राः वार्ताः मया पठिताः। इथियोपिया-देशे वैज्ञानिकैः वानराणां स्थाने वृषभगर्दभयोः अतीव विचित्रा प्रीतिः दृष्टा। ताभ्याम् अन्ये पशवः न दृष्टाः, केवलं स्वप्रीतिपात्रम् एव दृष्टम्।


नन्दिनी- अहो! पशूनां सा प्रीतिः खलु विचित्रा। अन्या आश्चर्यकरी वार्ता पेन्सिलवेनिया-प्रदेशात् आगता। तत्र एकेन नरेण एकस्मिन् एव वर्षे चित्रमन्दिरे सप्तोत्तर-द्विशताधिक-सहस्रम् (१२०७) चलच्चित्राणि दृष्टानि! तेन नूतनः विश्वविक्रमः स्थापितः।

काव्या- आश्चर्यम्! तेन नरेण बहु समयः तस्मिन् चित्रमन्दिरे एव यापितः। शृणु, वर्जीनिया-प्रदेशे एकः श्येनः उड्डयितुम् असमर्थः जातः। अक्षत- शरीर- युक्तेन अपि तेन अतीव अधिकं भोजनं खादितम्। अतः सः अतीव स्थूलः जातः।

नन्दिनी- हह! तेन पक्षिणा अपि मिष्टान्नादिकं बहु भक्षितम् इति भाति। अस्माकं भारते अपि एका विचित्रा घटना जाता। मुम्बा-नगरे अधिकोषस्य एकेन कर्मकरेण पणं जेतुम् धाम-चतुष्क-यात्रायां सम्पूर्णः उपवासः कृतः। भोजनं विना एव तेन सा यात्रा समाप्ता, पणः च जितः।

काव्या- देवभक्त्या न, परन्तु केवलं मित्रस्य पणेन सः उपवासं कर्तुं प्रेरितः! अतिविचित्रम्। एतासां विचित्राणां वार्तानां निवेदनाय कृतज्ञताम् अर्पयामि तुभ्यम्।

नन्दिनी- मम सौभाग्यम्। श्वः पुनर्मेलिष्यावः।



हिमाचलसर्वकारस्य घोषणा :

दीपावल्याः प्राक् सर्वेभ्यः कर्मचारिभ्यः वेतनम्, १४४४ श्रमिकपरिवारेभ्यः ६.१० कोटिरूप्यकाणाम् उपहारः

हिमसंस्कृतवार्ता — शिमला।

दीपावलीपर्वणि प्रदेशस्य विविधानां विभागानां, निगमानां, मण्डलानां (बोर्ड) च कर्मचारिभिः वेतनाय प्रतीक्षा न करणीया भविष्यति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः वित्तविभागं प्रति निर्देशान् प्रादात् यत् उत्सवात् पूर्वमेव सर्वेषां वर्गाणां कर्मचारिणां वित्तकोष-संख्यासु वेतनस्य मासिकभुक्तेः च समर्पणाय व्यवस्था विधीयताम्। सर्वकारेण नियमितकर्मचारिभिः सहैव अस्थायीरूपेण सेवां प्रयच्छद्भ्यः कर्मचारिभ्यः अपि समये प्रदानस्य लक्ष्यं निर्धारितम्। सर्वकारेण वित्तीयसंसाधनेषु भारस्य मध्येऽपि पर्वणः प्राक् भुक्तिनिश्चयस्य सङ्कल्पः स्वीकृतः। मुख्यमन्त्रिणा आदिष्टं यत् वेतनविषये कस्यापि वर्गस्य कर्मचारिणा सह भेदभावाचरणं न भवेत्, विशेषरूपेण च न्यूनवेतनभोगिकर्मचारिभ्यः समये एव धनं समुपलभ्येत।



निगमेषु मण्डलेषु च सेवारताः कर्मचारिणः अपि समाविष्टाः भविष्यन्ति

अस्यां व्यवस्थायां सर्वकारीयविभागानाम् अतिरिच्य निगमेषु मण्डलेषु च सेवारताः कर्मचारिणः अपि समाविष्टाः भविष्यन्ति। संविदायां (अनुबन्धपदे) नियुक्तानां कर्मचारिणां, दैनन्दिनवेतनभोगिनां (दिहाड़ीदार), अंशकालिककर्मचारिणां, मानदेयेन कार्यरतानां च जनानां भुक्तये अपि प्राथमिकता प्रदास्यते। इतः, दीपावल्याम् अवसरे प्रदेशस्य १,४४४ पञ्जीकृतश्रमिकेभ्यः तेषां परिवारेभ्यश्च प्रदेशसर्वकारः आर्थिकसाहाय्यस्य उपहारं प्रदातुं गच्छति। 'भवन-तथा-अन्य-निर्माण-कर्मकर-कल्याण-मण्डलस्य' (BOCW Board) माध्यमेन कुलम् ६ कोटिः १० लक्ष ५७ सहस्रं ३१० (६,१०,५७,३१०) रूप्यकाणां साहाय्यराशिः वितरिष्यते।

मुख्यमन्त्री ६ नवम्बर्-दिनाङ्के राशिं वितरिष्यति

मुख्यमन्त्री ६ नवम्बर्-दिनाङ्के अस्याः राशेः वितरणं करिष्यति। विवाहसाहाय्ययोजनायाः अन्तर्गततया १ कोटिः ७० लक्षम् ८७ सहस्रं (१,७०,८७,०००) रूप्यकाणि, शिक्षासाहाय्ययोजनायां ३ कोटयः १४ लक्षाणि ६७ सहस्रं सप्तशतं (३,१४,६७,७००) रूप्यकाणि, तथा च चिकित्सासाहाय्ययोजनायाः अन्तर्गततया ५४ सहस्रं षट्शतं दश (५४,६१०) रूप्यकाणि वितरिष्यन्ते। मृत्यु-अन्त्येष्टि-साहाय्ययोजनायाः कृते ३२ लक्षाणि ८० सहस्रं रूप्यकाणि, 'मुख्यमन्त्री आवासयोजनायाः' अन्तर्गततया ८६ लक्षाणि ५८ सहस्रं रूप्यकाणि, अवशिष्टानि ५ लक्षाणि १० सहस्रं रूप्यकाणि च अन्यासां कल्याणकारियोजनानां साहाय्यमदानां च अन्तर्गततया वितरितानि भविष्यन्ति।

मण्ड्यां सर्वाधिकानि ४४० लाभार्थिजनाः

मण्डी-मण्डलस्य सर्वाधिकेभ्यः ४४० लाभार्थिभ्यः १ कोटिः ६१ लक्षाणि १८ सहस्रं द्विशतं (१,६१,१८,२००) रूप्यकाणां साहाय्यं लप्स्यते। शिमला-मण्डलस्य १८३ लाभार्थिभ्यः ७२ लक्षाणि ९७ सहस्रं द्विशतं (७२,९७,२००) रूप्यकाणि, किन्नौर-मण्डलस्य १६८ लाभार्थिभ्यः ६४ लक्षाणि ९२ सहस्रं द्विशतं (६४,९२,२००) रूप्यकाणि, हमीरपुर-मण्डलस्य च १४८ लाभार्थिभ्यः ६४ लक्षाणि ९४ सहस्रं षट्शतं दश (६४,९४,६१०) रूप्यकाणि वितरिष्यन्ते।

बिलासपुर-मण्डलस्य १७३ लाभार्थिभ्यः ६५ लक्षाणि ५३ सहस्रम् अष्टशतं (६५,५३,८००) रूप्यकाणि, ऊना-मण्डलस्य १४२ लाभार्थिभ्यः १ कोटिः ५ लक्षाणि नवसहस्रं सप्तशतं (१,०५,०९,७००) रूप्यकाणि, काङ्गड़ा-मण्डलस्य ६३ लाभार्थिभ्यः ३१ लक्षाणि द्विशतं (३१,००,२००) रूप्यकाणि, चम्बा-मण्डलस्य च ५० लाभार्थिभ्यः १४ लक्षाणि १२ सहस्रं षट्शतं (१४,१२,६००) रूप्यकाणां साहाय्यं प्रदास्यते। सिरमौर-मण्डलस्य २९ लाभार्थिभ्यः १५ लक्षाणि ३८ सहस्रं द्विशतं (१५,३८,२००) रूप्यकाणि, कुल्लू-मण्डलस्य ३८ लाभार्थिभ्यः ९ लक्षाणि ४५ सहस्रं षट्शतं (९,४५,६००) रूप्यकाणि, सोलन-मण्डलस्य च १० लाभार्थिभ्यः ५ लक्षाणि ९५ सहस्रं (५,९५,०००) रूप्यकाणाम् आर्थिकसाहाय्यं प्रदास्यते।

मा अनादिचेतना मा अनन्तकल्पना



मा अनादिचेतना मा अनन्तकल्पना
कोटिसूर्यपुञ्जज्योतिः परमसत्यसाधना
मा अनादिचेतना मा अनन्तकल्पना ।००।
कालकाव्यलेखाया अब्दशब्दमाला रे
गृणाति नीलवारिधिरूर्म्युत्तालतालः रे
मन्दमलयहिल्लोले गुञ्जति या मूर्च्छना
मा अनादिचेतना मा अनन्तकल्पना
कोटिसूर्यपुञ्जज्योतिः परमसत्यसाधना
मा अनादिचेतना मा अनन्तकल्पना ।०१।
सृष्टिपद्मे स्फुटितं नित्यं तव सौरभम्
वेदस्त्वं मा, कोटिकण्ठे गीतं तव गौरवम्
दिव्यज्योतिः विश्वयज्ञे त्वं हि स्वर्गसाधना
मा अनादिचेतना मा अनन्तकल्पना
कोटिसूर्यपुञ्जज्योतिः परमसत्यसाधना
मा अनादिचेतना मा अनन्तकल्पना ।०२।
नित्यपूतरूपपात्रे त्वम् अरूपा अमृता
कालकोले कालहीना त्वं क्रीडसि सर्वथा
युष्मत्प्रीतिज्योत्स्नायोगे नष्टा यमयातना
मा अनादिचेतना मा अनन्तकल्पना
कोटिसूर्यपुञ्जज्योतिः परमसत्यसाधना
मा अनादिचेतना मा अनन्तकल्पना ।३।
अहं शिशिरः विश्वपुष्पे सूर्यस्त्वं मे गगने
युष्मच्छुभ्रज्योतिषा मे भव तनूचेतने
सिन्धुस्त्वं मा न्वहं बिन्दुः
सिन्धुस्त्वं मा न्वहं बिन्दुः
गृहाण भक्तिप्रार्थनाः
मा अनादिचेतना मा अनन्तकल्पना
कोटिसूर्यपुञ्जज्योतिः परमसत्यसाधना
मा अनादिचेतना मा अनन्तकल्पना ।०४।

रचयिता - आचार्यः डा. रुरुकुमारमहापात्रः राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (मूलरचना ओडिआभाषायाम्- दिवङ्गतो मम पितृवर्यः श्रीपूर्णचन्द्रमहापात्रमहोदयः)

हिमाचलप्रदेशस्य पञ्च रोचकतथ्यानि

१. संस्कृतं द्वितीया राजभाषा

उत्तराखण्डस्यानन्तरं हिमाचलप्रदेशः भारतस्य द्वितीयं राज्यम् अस्ति, येन संस्कृतभाषा स्वस्य द्वितीया राजभाषा घोषिता।

२. प्राचीनतमं लोकतन्त्रम्: मलाणा

कुल्लूजनपदे स्थितः 'मलाणा' ग्रामः विश्वस्य प्राचीनतमासु लोकतान्त्रिकव्यवस्थासु अन्यतमः मन्यते, यत्र स्वकीया स्वतन्त्रा न्यायव्यवस्था अस्ति।

३. सर्वोच्चं मतदानकेन्द्रम्: ताशीगङ्ग

लाहौल-स्पीतिजनपदे स्थितः 'ताशीगङ्ग' ग्रामः समुद्रतलात् प्रायः १५,२५६ पादोन्नते (फीट) स्थाने अस्ति, यत् विश्वस्य उच्चतमं मतदानकेन्द्रं वर्तते।

४. प्राकृतिकं हिम-कन्दुक-क्रीडाङ्गणम् (Ice Skating Rink)

राजधान्यां शिमलानगरे स्थितम् 'आइस स्केटिङ्ग रिङ्क' एशिया-महाद्वीपस्य एकमेव प्राकृतिकं तथा मुक्तं हिमक्रीडाङ्गणम् अस्ति।